ॐ

पातञ्जलयोगदर्शनम् ।

'गुजराती' प्रेसस्थ–क्रय्यानि संस्कृत-पुस्तकानि ।

	रु. आ. पै.
अष्टटीकोपेता श्रीमद्भगवद्गीता द्वितीयो भागः	१०– ०–०
अद्वैतमंजरी (ब्रह्मसूत्रवृत्तिः)	०–१२–०
आचारमयूखः	०– ८–०
उत्तरगीता	०– ३–०
उत्सर्गमयूखः	०– ४–०
उपदेशसाहस्री	१– ८–०
उद्योगपर्व (महाभारतस्य) अष्टटीकोपेतम् ...	८– ८–०
उत्तरकाण्डम् (वा. रामायणस्य) टीकात्रयोपेतम्	६– ०–०
कारिकावली–सिद्धांतमुक्तावली	०–१०–०
गणेशसहस्रनामावली	०– ३–०
चन्द्रालोकः	०–१०–०
चम्पूभारतम्	२– ०–०
तैत्तिरियोपनिषद्	१– ०–०
तर्कसंग्रहः–सिद्धांतचन्द्रोदय सहितः... ...	०–१०–०
दशरूपकम्	१– ०–०
दानमयूखः	२– ०–०
न्यायभाष्यम्–न्यायदर्शनम्	९– ०–०
न्यायबिन्दुः	१– ४–०
नागरसर्वस्वम्...	४– ०–०
नीतिमयूखः	१– ४–०

YOGA DARSHANAM

OF

PATANJALA MUNI

With the commentary known as

PADA-CHANDRIKA

by

ANANT PANDITA

The "Gujarati" Printing Press,

BOOKSELLERS & PUBLISHERS.

SASSOON BUILDING, FORT,

BOMBAY No. 1

A. D. 1927. V. S. 1983.

To be had from:—

The "Gujarati" Printing Press,

Sassoon Buildings, Elphinstone Circle,

Fort, BOMBAY. No. 1.

Printed, and Published by

NATVERLAL ITCHARAM DESAI at

THE "GUJARATI" PRINTING PRESS,

Sassoon Buildings, Elphinstone Circle, Fort,

BOMBAY No 1.

पातञ्जल योगदर्शनम्.

अनन्त पण्डित विरचितया पदचन्द्रिकाख्यया
टीकया, तथा च अधिकरण दर्शक नूतन
टीप्पण समेतम्.

प्रकाशकः
" गुजराती " प्रिन्टिङ्ग प्रेस,
सासुन बिल्डिंग, एल्फिन्स्टन सर्कल, फोर्ट,
मुंबई नं. १.

शकः १८४९. संवत् १९८३.

पुस्तकप्राप्तिस्थानम् :—
"गुजराती" प्रिंटिंग प्रेस,
बुक्सेलर्स एण्ड् पब्लिशर्स.
सासुन बिल्डिंग
एल्फिन्स्टन सर्कल, फोर्ट, मुंबई नं. १

न. इ. दे. इत्येतैः स्वीये "गुजराती प्रिन्टिङ्ग प्रेस"
नाम्नि मुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम् ।
कोट, एल्फिन्स्टन् सर्कल-सासुन बिल्डिंग्,
मुंबई नं. १.

PREFACE

A friend of mine gave me a copy of a commentary on Yoga Sutras, which he had got written from a manusrcipt of his guru. When I first read it, I found that it is simpler and concise than the Bhashya of Vyas, and would prove especially very useful to beginners, if printed. Besides it contained some new aphorisms, which are not found in the current printed copies, based on the Bhashya of Vyas, whereas some aphorisms are found incorporated in the Bhashya. All such SUTRAS are shown separate at the proper place in the printed book in square brackets, and the attention of the reader is drawn to them in the footnotes; and I hope that this book will be interesting and helpful by the introduction of this new feature. The name of the commentator is given as Ananta Pandit, but nobody could say with any precision who he was and when and where did he live and made his name. It seems

strange that this short but lucid commentary should have remained for a long time unknown to the student world; but it seems probable that this commentary being an epitome of the wellknown Vritti of Bhoja, it was neglected, as the original Vritti became very popular along with the Bhashya of Vyas. But the disparity in the number of sutras remains inexplicable. At this date it cannot be ascertained what was the exact number of sutras that the great Pantanjali composed, though it would be an interesting research work for students and savants. Besides it seems strange also that the voluminous writer Vyas, who found time to write a Bhashya on Yoga-sutras, should have left his own Vedant Sutras ambiguous and uncommented, and thus give a free scope to the different Acharyas to interprete them according to their own whims and beliefs, imposing all the time on the minds of the readers that the interpretation given by them alone is the true meaning of the sutras, which the writer of the sutras had in his mind while composing them. Another question to be solved is whether Vyas, the writer of Bhashya on the Yoga Sutras of Patan-

jali, and Vyas the writer of Bharat and the Purans and Vyas the composer of the Vedant sutras are one and the same person or different ?

The few new aphorisms given along with the commentary of Ananta Pandit, will throw some new light in the proper understanding and interpretations of the yoga vidya. The publishers hope that the book will be a welcome addition to the already existing literature on yoga shastra. I must not here omit to mention the great pains which Shastri Gajanan Shambhu Sadhale has taken in correcting the press-copy and proofs, and the footnotes that he has added to it.

Bombay
17–5–1927. } **Natverlal Itcharam Desai**

उपोद्घातः ।

इह खलु दुःखमये मर्त्यलोके दुःखनिवृत्तिपूर्विका सुखावाप्तिरेवाखिललोकाभीप्सिता । तत्र केचन प्राकृतोपकरणपराः केचन श्रुतिस्मृत्युक्तोपकरणशीलाश्चातज्ज्ञास्तदर्थमहर्निशं प्रयतमाना अपि कदाचित् क्वापि किञ्चिदप्यश्रान्तं सुखलेशं न लभन्ते ।

दुःखं नाम सर्वेषां सचेतसां प्रतिकूलवेदनीय इष्टवियोगानिष्टसंयोगजश्चित्तधर्मविशेषः, तच्चाधर्मजमाध्यात्मिकाधिभौतिकाधिदैविकभेदात्त्रिविधम्, यद्बाधात्प्राणिनस्तदपघाताय प्रवर्तन्ते । शोभनानि परिपुष्टानि खानीन्द्रियाणि येन तत् सुखं तेषामेवानुकूलवेदनीयोऽनिष्टवियोगेष्टसंयोगजश्चित्तधर्मविशेषः; तत्तु द्विविधं, जन्य नित्यं च । मित्र–पुत्र–कलत्र–धन–लाभारोग्य–मिष्टान्नपानाद्युद्भूतं तत्तद्विनाशान्तं जन्यम् । ‘ यद्दृष्टं तन्नष्टं ’ इति स्मृतेर्विषयविरागादात्मानात्मविवेकोत्तरं सच्चिदानन्दात्मकं नित्यम् । एतौ वक्ष्यमाणलक्षणस्य चित्तस्यैव धर्मौ ।

शुद्धचैतन्यरूपा या चित् तदेवानुसन्धानात्मिकान्तःकरणवृत्ति चित्तमित्युच्यते । तद्यथा “ द्वितीयाद्वै भयं भवति ” इति श्रुतेः संसारिणश्चित्तं अहम्म-

मादिविषयमदात्मकतकारोपाधि – संयोगाज्जडीभूतं द्वंद्वीभूतं च भवति तदा क्षुत्पिपासा–शोकमोह–कामक्रोध-शीतोष्ण–सुखदुःखेष्टानिष्टादिभिर्द्वन्द्वैरुपहन्यमानं सत् जलौघवदधोऽधो द्वन्द्वान्यनुधावति विषयविषजलधौ निमज्ज ति च। न पुनस्तत आत्मानं समुद्धर्तुं शक्नोति।

इति विचार्य कृपार्द्रचित्तेन भगवता पतञ्जलिना भवाम्भोनिधिनिमग्नानां विषयाकृष्टमानसानां मानवानां द्वंद्वीभूतस्य चिद्रूपस्य चित्तस्योपाधिनिरासेनात्यंतिकदुःखनिवृत्तिपूर्वकाजस्रसुखावाप्तिद्वारा स्वस्वरूपस्थितिर्येन भवेत्तथाभूतोऽयं योगदर्शनाख्यश्चतुष्पाद्ग्रन्थो व्यरचि।

योगो नाम चित्तस्य तत्तदुपाध्याकृष्टानां वृत्तीनां बहिर्मुखताविच्छेदपूर्वकोऽन्तर्मुखतया स्वकारणे सच्चिदानन्दरूपे लयः, तस्य दर्शनं नाम शास्त्रमिदम्। तस्याभ्यासाच्चित्तशुद्धिः, चित्तशुद्ध्या आत्मानात्मज्ञानप्राप्तिः, ज्ञानावाप्त्या सच्चिदानन्दस्य परमात्मनः स्वरूपसाक्षात्कारो मुक्तिचतुष्टयावाप्तिश्च। योगाभ्यासत एव योगी स्वेच्छयैवायुरारोग्याद्यखिलैश्वर्यं यथेच्छं समवाप्य सार्वभौम-माहेन्द्र–पारमेष्ठ्यादीनामन्यतममपेक्षितं पदमधिगच्छति। उक्तं चादित्यपुराणे—

योगात् सञ्जायते ज्ञानं योगो मय्येकचित्तता।

तथाच स्कन्धपुराणे—

आत्मज्ञानेन मुक्तिः स्यात्तच्च योगादृते नहि ।

कूर्मपुराणे—

योगाग्निर्दहति क्षिप्रमशेषं पापपञ्जरम् ।
प्रसन्नं जायते ज्ञानं ज्ञानान्निर्वाणमृच्छति ।

योगवासिष्ठे—

दुःखहा राम संसारविषवेगा विषूचिका ।
योगगारुडमंत्रेण पावनेनोपशाम्यति ॥

मनुः—

सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः ।

याज्ञवल्क्यः—

इज्याचार-दमाहिंसा-दान-स्वाध्यायकर्मणाम् ।
अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥ इति—

एवमादिभिर्वचनैर्योग एवाखिलदुःखनिवृत्तिकरः सर्वसुखार्थप्रदश्चाश्रयणीयो निरतिशयसुखार्थिभिरिति ।

बहुगभीरार्थैरविलम्बितसूत्रैर्ग्रथितस्यास्य ग्रन्थस्यातिदुर्बोधत्वात् ब्रह्मसूत्राष्टादशपुराणोपपुराणेतिहासादिप्रणेतृवेदव्यासविरचितेन भाष्येण, विज्ञानभिक्षुभोजराजादिभिरनेकैरभ्यसितयोगैर्विद्वद्भिः प्रणीतैर्व्याख्यावृत्तिटीका-

न्तरैश्च भूषितानि पुस्तकान्यनेकान्यत्रान्यत्र च मुद्रितान्युपलभ्यमानानि भारभूतानि यत्रकुत्रापि स्थितानां प्रवासिनामकिञ्चनानां च जनानां स्थानसङ्कोचाद्भारभूतत्वान्मूल्याधिक्याच्च दुष्क्रेयाण्यसंग्राह्याण्यैव दृश्यन्ते। अतः कतिपयसुहृत्प्रहितैरस्मच्छ्रेष्ठिभिः श्रीमद्भिः इच्छारामतनूजैः ' नटवरलाल ' इत्याख्यर्मुद्रितान्यान्ययोगदर्शनव्याख्यावृत्तिभाषान्तरैरपि तन्मनोभिलषितपूर्तये, श्रीमतां विदुषां प्रमोदाय, लक्ष्मीवतामलक्ष्मीकाणां च सौकर्यायेदं पुस्तकं अल्पमूल्यत्वात् सुखग्राह्यमभारभूतत्वाच्च सुखसंग्राह्यं विधाय श्रीमदनंतपंडितप्रणीतया व्याख्यया व्यासभाष्यादिसम्मतैः [ ] इतिचिह्नाङ्कितैः पाठपाठान्तरैश्च समलङ्कृत्य मुद्रयित्वा प्रकाशितम्। इत्यलम्।

'साधले' इत्युपाभिख्यः
शम्भुपुत्रो गजाननः।

गुजराती-प्रेस, संस्कृतग्रन्थमालिका.

	रु.	आ.	पै
दशरूपकं सावलोकं सप्रभं च.	१	४	०
चन्द्रालोकः रमाव्याख्यासहितः	०	१२	०
चम्पूभारतम्	२	०	०
वैशेषिकदर्शनम्	२	०	०
न्यायभाष्यम्	९	०	०
न्यायबिन्दुः	१	४	०
तर्कसंग्रहः	०	१०	०
वादार्थसंग्रहः भागः १	०	६	०
,, भागः २	०	६	०
,, भागः ३	०	८	०
कारिकावली-सिद्धांत मुक्तावलीसहिता.	०	१०	०
विराटपर्व अष्टटीकोपेतं.	४	८	०
उद्योगपर्व पंचटीकोपेतं.	८	८	०
ब्रह्मसूत्रवृत्ति अद्वैतमंजरी.... ...	०	१२	०
उपदेशसाहस्री (सटीका)	१	८	०

॥ श्रीगणेशाय नमः ॥

पातञ्जलयोगदर्शनम् ।

अनन्तपण्डितविरचितया पदचन्द्रिकाख्यया टीकया समेतम् ।

तत्र समाधिपादः १ ।

अथ योगानुशासनम् ॥ १ ॥

अथशब्दोऽधिकारवाची । योगो नाम समाधानमनु-
शिष्यते व्याख्यायते येन तत् ॥ १ ॥

योगलक्षणमाह—

योगश्चित्तवृत्तिनिरोधः ॥ २ ॥

सत्त्वपरिणामरूपस्य चित्तस्य या वृत्तयः, तासां निरोधो बहिर्मुखताविच्छेदादन्तर्मुखतया स्वकारणे लयः॥ २ ॥

तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥ ३ ॥

तस्मिन्निरोधसमाधिकाले द्रष्टुः पुरुषस्य स्वरूपे चिन्मात्रे अवस्थानं स्थितिर्भवति ॥ ३ ॥

वृत्तिसारूप्यमितरत्र ॥ ४ ॥

इतरत्र योगादन्यस्मिन्काले वक्ष्यमाणलक्षणवृत्तिभिः सारूप्यं तद्रूपत्वम् ॥ ४ ॥

चित्तवृत्तिभेदांस्तन्निरोधं चाह—

वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ॥ ५ ॥

चित्तस्य परिणामभेदाः क्लेशैराक्रान्तास्तद्भिन्नाश्च ॥ ५ ॥

प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ६

एताः पञ्च वृत्तयः । तासां व्याख्याऽग्रिमसूत्राणि ॥ ६ ॥

प्रमाणभेदांस्तल्लक्षणं चाह—

प्रत्यक्षानुमानागमाः प्रमाणानि॥ ७ ॥

बाह्यवस्तुनीन्द्रियद्वारेण चित्तस्योपरागादर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षम् ॥ ७ ॥

[गृहीतसंबन्धाल्लिङ्गाल्लिङ्गिनि सामान्यात्मनाध्यवसायोऽनुमानम् ॥८॥

अनुमानं नाम गृहीतसंबन्धाद्धेतोः पक्षे साध्यस्य सामान्यात्मना निश्चयः ॥ ८ ॥]

[आप्तवचनमागमः ॥ ९ ॥

आप्तस्येश्वरस्य वाक्यं वेदः ॥ ९ ॥]

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ॥ १० ॥

अतथाभूतेऽर्थे तथोत्पद्यमानं ज्ञानं विपर्ययः । संशयोऽप्यतद्रूपप्रतिष्ठत्वान्मिथ्याज्ञानम् ॥ १० ॥

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ॥ ११ ॥

---

१ [ ] इत्येतल्लक्षणलक्षितानि सूत्राणि केषुचिन्मुद्रितामुद्रितेषु पातञ्जलयोगदर्शनपुस्तकेषु न दृश्यन्ते, तथाप्येतावद्धेतुनैवैतेषां सूत्राणां प्रक्षिप्तत्वं न सिद्ध्यति । अत एवात्र तानि सङ्गृहीतानि ।

शब्दजज्ञानानुपतनशीलो वस्तुनस्तथात्वमनपेक्षमाणो निश्चयो विकल्पः ॥ ११ ॥

अभावप्रत्ययालम्बना वृत्ति-र्निद्रा ॥ १२ ॥

अभावप्रत्यय आलम्बनं यस्या वृत्तेः, सा निद्रा ॥१२॥

अनुभूतविषयासम्प्रमोषः स्मृतिः ॥ १३ ॥

अनुभूतस्य विषयस्य योऽयमसम्प्रमोषः संस्कारद्वारेण बुद्धावुपारोहः, सा स्मृतिः ॥ १३ ॥

अभ्यासवैराग्याभ्यां तन्निरोधः ॥१४॥

वक्ष्यमाणलक्षणाभ्यासवैराग्याभ्यां तासां चित्तवृत्तीनां यत्प्रतिहननं स निरोधः ॥ १४ ॥

अभ्यासलक्षणमाह—

तत्र स्थितौ यत्नोऽभ्यासः ॥१५॥

वृत्तिरहितस्य चित्तस्य स्वरूपनिष्ठः परिणामः स्थितिः । तस्यां यत्न उत्साहः पुनः पुनस्तथात्वेन चेतसि निवेशनमभ्यासः ॥ १५ ॥

स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः ॥ १४ ॥

बहुकालं नैरन्तर्येणादरातिशयेन सेव्यमानो दृढभूमिः स्थिरो भवति ॥ १४ ॥

वैराग्यलक्षणमाह—

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ॥ १५ ॥

दृष्ट इहोपलभ्यमानः शब्दादिः, देवलोकादावानुश्रविकः, तयोः परिणामविरसत्वदर्शनाद्विगतगर्धस्य वशीकारसंज्ञा वैराग्यमुच्यते ॥ १५ ॥

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ॥ १६ ॥

गुणवैतृष्ण्यरूपमुत्कृष्टं वैराग्यमुत्पन्नगुणपुरुषविवेकख्यातेर्भवति ॥ १६ ॥

सम्प्रज्ञातसमाधिलक्षणमाह—

वितर्कविचारानन्दास्मितानुगमात्संप्रज्ञातः ॥ १७ ॥

वितर्कादिचतुष्टयभेदेनानुगमात् सम्यक्प्रकर्षेण ज्ञायते भाव्यस्वरूपं येन सः ॥ १९ ॥

असम्प्रज्ञातसमाधिलक्षणमाह—

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ॥ २० ॥

विरम्यतेऽनेन, स चासौ प्रत्ययश्च, तस्याभ्यासः पुनः पुनश्चेतसि निवेशनमसंप्रज्ञात इत्यर्थः । तत्र या काचिद्वृत्तिरुल्लसति, तस्याः 'नेति नेति' इति श्रुत्या निरासः कार्यः ॥ २० ॥

[तदुपायानाह—

प्रतिपरिणामं च संस्कारः ॥ २१ ॥

तत्र व्युत्थानाद्याः संस्काराः समाधिप्रारम्भाद्यैः संस्कारैर्हन्यन्ते ॥ २१ ॥]

भवप्रत्ययो विदेहप्रकृतिलयानाम् ॥ २२ ॥

विदेहप्रकृतिलयानां समाधिः भवप्रत्ययः संसार एव कारणं यस्य ॥ २२ ॥

---

१ अस्यैव पादस्याष्टमसूत्रस्थं टिप्पणमत्रानुसन्धेयम् ।

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् ॥ २३ ॥

अन्येषां श्रद्धादिपूर्वकः चेतःप्रसादोत्साहस्मृत्येकाग्रता-विवेकपूर्वको भवति ॥ २३ ॥

[तस्याभ्यासात्पराच्च वैराग्याद्भव-त्यसम्प्रज्ञातः ॥ २४ ॥

सविकल्पसमाधेरभ्यासात्तत्पूर्वं यस्य तादृशः संस्कार-षाद्वैराग्यादसम्प्रज्ञातः ॥ २४ ॥]

तीव्रसंवेगानामासन्नः ॥ २५ ॥

संस्कारस्तीव्रो येषां तेषां समाधिलाभः शीघ्रं भवति ॥ २५ ॥

मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः ॥ २६ ॥

मृद्वादिसंवेगभेदाद्योगिनोऽपि भिन्नाः । तेषां समाधिलाभो दीर्घकालादिभेदेन भवतीत्यर्थः ॥ २६ ॥

तत्रैव लघूपायानाह—

ईश्वरप्रणिधानाद्वा ॥ २७ ॥

सुगमोपायोऽयं भक्तिविशेष ईश्वरे सर्वक्रियाणा-मर्पणं वा ॥ २७ ॥

ईश्वरलक्षणमाह—

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुष-विशेष ईश्वरः ॥ २८ ॥

अविद्यादयः क्लेशाः, कर्माणि, जात्यायुर्भोगाः आ फल विपाकाच्चित्ते शेरत इत्याशया वासनाः, तैर्न संसृष्ट अन्येभ्यः पुरुषेभ्यो विशिष्ट ईशनशीलः ॥ २८ ॥

तत्र प्रमाणमाह—

तत्र निरतिशयं सर्वज्ञबीजम् ॥ २९ ॥

तस्मिन्भगवति सर्वज्ञस्य यद्बीजं सर्वस्य मूलत्वाद्बीज मिव बीजम्, तन्निरतिशयं काष्ठां प्राप्तम् ॥ २९ ॥

तच्छ्रैष्ठ्यमाह—

स (एषः[1]) पूर्वेषामपि गुरुः कालेना-नवच्छेदात् ॥ ३० ॥

---

१ 'एषः' इत्यधिकः शब्दो भाष्ये मणिप्रभा-राजमार्तण्ड-टीकाद्वये च ।

स ब्रह्मादीनामपि गुरुरुपदेष्टा, यतः स कालेन नावच्छिद्यतेऽनादित्वात् । तेषां पुनरादिमत्त्वादस्ति कालेनावच्छेदः ॥ ३० ॥

तद्वाचकादि सुगमोपायमाह—

तस्य वाचकः प्रणवः ॥ ३१ ॥

ईश्वरस्याभिधायक ॐकारः ॥ ३१ ॥

तज्जपस्तदर्थभावनम् ॥ ३२ ॥

तस्य प्रणवस्य जपः प्रणववाच्यस्येश्वरस्य भावनं पुनः पुनश्चेतसि निवेशनमेकाग्रतायां उपायः ॥ ३२ ॥

तदुपासनाफलमाह—

ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ॥ ३३ ॥

तस्माज्जपात्तदर्थभावनाच्च विषयप्रातिकूल्येनाञ्चति याहक्छक्तिः तस्या अधिगमो ज्ञानं भवति, वक्ष्यमाणान्तरायशक्तिप्रतिबन्धश्च भवतीत्यर्थः ॥ ३३ ॥

चित्तविक्षेपहेतूनि विघ्नान्याह—

व्याधिस्त्यानसंशयप्रमादालस्याविर-

तिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः ॥ ३४ ॥

व्याधिर्ज्वरादिः, स्त्यानमकर्मण्यता, उभयकोट्यालम्बन विज्ञानं संशयः, प्रमादोऽनवधानता, आलस्यं कायचित्त योर्गुरुत्वम्, अविरतिर्विषयासक्तिः, भ्रान्तिदर्शनं विपर्यय ज्ञानम्, अलब्धभूमिकत्वं समाधिभूमेरलाभः, अनवस्थितत्वं चित्तस्य समाधावप्रतिष्ठा, एते नव विघ्नानी त्युच्यन्ते ॥ ३४ ॥

दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षपसहभुवः ॥ ३५ ॥

तत्र दुःखं चित्तस्य रागजः परिणामो बाधनलक्षणः दौर्मनस्यं करणैर्मनसो दौःस्थ्यम्, अङ्गमेजयत्वं सर्वाङ्गवेपथुः, प्राणो यत्र बाह्यवायुमाचामति स श्वासः; यत्कोष्ठ्यः वायुं निःश्वसिति स प्रश्वासः; एते विक्षेपैः सहाभ्यास वैराग्याभ्यां निरोद्धव्याः ॥ ३५ ॥

विक्षेपादिनिरोधायोपायानाह—

तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥ ३६ ॥

तेषां विक्षेपाणां निषेधार्थं कस्मिंश्चिदभिमते तत्त्वेऽभ्यासः ॥ ३६ ॥

मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् ॥ ३७ ॥

मैत्रीं सौहार्दं सुखितेषु, करुणां कृपां दुःखितेषु, मुदितां हर्षं पुण्यवत्सु, उपेक्षामौदासीन्यमपुण्यवत्सु भावयेत्। एवं मैत्र्यादिपरिकर्मणा चित्तं प्रसीदति। रागद्वेषनिरासे सुखेन समाधिप्रादुर्भावो भवत्येकाग्रता च ॥ ३७ ॥

प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ॥ ३८ ॥

प्रच्छर्दनं नाम तद्यत्कोष्ठयस्य वायोः प्रयत्नविशेषाद्बहिर्निस्सारणम्। विधारणं मात्राप्रमाणेन प्राणस्यायामो गतिविच्छेदः ॥ ३८ ॥

तत्रापि मनोनिरोधोपायमाह—

विषयवती वा प्रवृत्तिरुत्पन्ना स्थितिनिबन्धनी ॥ ३९ ॥

विषया दिव्यगन्धाद्या विद्यन्ते फलत्वेन यस्यां सा संविन्मनसः स्थैर्यं करोतीत्यर्थः ॥ ३९ ॥

विशोका वा ज्योतिष्मती ॥ ४० ॥

ज्योतिःशब्देन सात्त्विकः प्रकाश उच्यते। सोऽतिशयवान्यस्यां सा ज्योतिष्मती प्रवृत्तिरुत्पन्ना विशोका विगतशोका सुखमयसत्त्वाभ्यासाच्चेतःस्थितिकर्त्री ॥ ४० ॥

वीतरागविषयं वा चित्तम् ॥ ४१ ॥

परित्यक्तविषयाभिलाषविषयकं चित्तं मनसः स्थितिनिबन्धनं भवतीत्यर्थः ॥ ४१ ॥

स्वप्ननिद्राज्ञानालम्बनं वा ॥ ४२ ॥

प्रत्यस्तमितबाह्यवृत्तेर्मनोमात्रेणैव यत्र भोक्तृत्वमात्मनः स स्वप्नः, निद्रा, तदालम्बनं ज्ञानं चेतसः स्थितिहेतुः ॥ ४२ ॥

यथाभिमतध्यानाद्वा ॥ ४३ ॥

यथाभिमतवस्तुनि बाह्ये आभ्यन्तरे नाडीचक्रादौ वा भाव्यमाने चेतसः स्थितिर्भवति ॥ ४३ ॥

परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ॥ ४४ ॥

एभिश्चेतःस्थैर्यं भावयतो योगिनः सूक्ष्मभावनाद्वारेण परमाण्वन्तः स्थूलभावनाद्वारेण परममहत्त्वान्तो वशीकारः, परमाणुपर्यन्ते सूक्ष्मे आकाशादिपर्यन्ते स्थूले च चेतसोऽप्रतिघातो भवति ॥ ४४ ॥

समापत्तितद्भेदांश्चाह—

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः ॥ ४५ ॥

क्षीणा वृत्तयो यस्य तस्य चेतसः स्फटिकमणेरिव ग्रहीतृग्रहणग्राह्येषु, तत्स्थत्वं तदेकाग्रता, तदञ्जनता तन्मयत्वम्, तथाविधा समापत्तिस्तद्रूपपरिणामो भवतीत्यर्थः ॥ ४५ ॥

(तंत्र)[1] शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का (समापत्तिः)[2] ॥ ४६ ॥

---

१ 'तत्र' इति शब्दविरहितं सूत्रं कुत्रचित्।

२ 'समापत्तिः' इति शब्दाधिक्यं राजमार्तण्डभोजवृत्त्योरसम्मतम्।

शब्दः, अर्थो जात्यादिः, ज्ञानं बुद्धिवृत्तिः, विकल्पः, एते यस्यां भासन्ते सा सवितर्का समापत्तिः ॥ ४६ ॥

स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्र-निर्भासा निर्वितर्का ॥ ४७ ॥

शब्दार्थस्मृतिप्रविलये स्पष्टग्राह्याकारप्रतिभासतया स्वरूपशून्येव निर्वितर्का समापत्तिः ॥ ४७ ॥

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥ ४८ ॥

एतयैव सवितर्कया निर्वितर्कया च सविचारा निर्विचारा च व्याख्याता । सूक्ष्मस्तन्मात्रेन्द्रियादिर्विषयो यस्याः सा । पूर्वा स्थूलविषया ॥ ४८ ॥

सूक्ष्मविषयत्वं चालिङ्गपर्य-वसानम् ॥ ४९ ॥

सविचारनिर्विचारयोः समापत्त्योर्यत्सूक्ष्मविषयत्वं तदालिङ्गपर्यवसानम् । न क्वचिल्लीयते न वा किंचिल्लिङ्गयति गमयतीत्यलिङ्गं प्रधानम् । तत्पर्यन्तं सूक्ष्मविषयत्वम् ॥ ४९ ॥

ता एव सबीजः समाधिः ॥ ५० ॥

ता एवोक्तलक्षणाः समापत्तयः सह बीजेनालम्बनेन वर्तत इति सबीजः सम्प्रज्ञातः समाधिरुच्यत इत्यर्थः, सर्वासां सालम्बनत्वात् ॥ ५० ॥

तत्र निर्विचारसमापत्तेः फलमाह--

निर्विचारवैशारद्येऽध्यात्मप्रसादः ॥ ५१ ॥

निर्विचारायाः प्रकृष्टाभ्यासवशाद्वैशारद्ये नैर्मल्ये सति, अध्यात्मप्रसादः समुपजायते । चित्तस्यैतदेव वैशारद्यं यत्स्थितौ दार्ढ्यम् ॥ ५१ ॥

तस्यापि फलमाह—

ऋतम्भरा तत्र प्रज्ञा ॥ ५२ ॥

ऋतं सत्यं बिभर्ति, कदाचिदपि न विपर्ययेणाच्छाद्यते, सा ऋतम्भरा प्रज्ञा तास्मिन्सति भवति। तस्माच्च प्रज्ञालोकात्सर्वं यथावत्पश्यन्योगी प्रकृष्टं योगं प्राप्नोति ॥ ५२ ॥

श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ॥ ५३ ॥

श्रुतमागमज्ञानम् , अनुमानमुक्तलक्षणम् , ताभ्यां या

जायते प्रज्ञा सा सामान्यविषया। इयं निर्विचारवैशारद्य-समुपेता ताभ्यां विलक्षणा, विशेषविषयत्वात्। अस्यां हि सूक्ष्मव्यवहितविप्रकृष्टविषयः स्फुटं भासते। अतस्तस्यां यत्नो विधेयः ॥ ५३ ॥

ऋतम्भराप्रज्ञायाः फलमाह—

तज्जः संस्कारोऽन्यसंस्कार-प्रतिबन्धी ॥ ५४ ॥

तया प्रज्ञया जनितो यः संस्कारः, सोऽन्यान् व्युत्थान-जान् समाधिजांश्च संस्कारान्प्रतिबध्नाति ॥ ५४ ॥

तस्यापि निरोधे सर्व(वृत्ति[2])निरोधान्निर्बीजः समाधिः ॥ ५५ ॥

तस्यापि संप्रज्ञातस्य निरोधे प्रविलये सति, सर्वासां चित्तवृत्तीनां स्वकारणे प्रविलयाद्या या संस्कारमात्राद्वृत्ति-रुदेति, तस्यां नेति नेति पर्युदसनान्निर्बीजः समाधि-राविर्भवति, यस्मिन्सति पुरुषः शुद्धो भवति ॥ ५५ ॥

इति श्रीपातञ्जलयोगदर्शने प्रथमः पादः।

---

१ 'श्रौतः' इति पुस्तकान्तरेषु पाठो दृश्यते।

२ 'वृत्ति-' इति राजमार्तण्ड-भोजवृत्त्योरधिकम्।

साधनपादः २।

समाहितचित्तस्य योगमभिधाय व्युत्थितचित्तस्य योगः कथं सिद्ध्यतीति तत्साधनप्रतिपादनायोपायभूतं क्रियायोगमाह--

तपस्स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥ १ ॥

तपः कृच्छ्रादि, स्वाध्यायः ओंकारपूर्वकमन्त्राणां जपः, ईश्वरप्रणिधानं सर्वक्रियाणां तस्मिन्समर्पणम्; एतानि क्रियायोगः ॥ १ ॥

क्रियायोगफलमाह--

समाधिभावनार्थः क्लेशतनूकरणार्थश्च ॥ २ ॥

उक्तलक्षणसमाधिभावनार्थः वक्ष्यमाणक्लेशशिथिलीकरणार्थश्च क्रियायोगः ॥ २ ॥

तत्र क्लेशपञ्चकमाह—

अविद्यास्मितारागद्वेषाभिनिवेशाः (पञ्च) क्लेशाः ॥ ३ ॥

वक्ष्यमाणलक्षणा अविद्यादयस्तापं जनयन्तः क्लेशशब्द-वाच्या भवन्ति ॥ ३ ॥

तेषु चतुर्णामविद्यामूलकत्वमाह—

अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् ॥ ४ ॥

अविद्या अनात्मन्यात्माभिमानः, सा क्षेत्रं प्रसवभूमिरुत्तरेषामस्मितादीनां प्रत्येकं प्रसुप्तादिभेदेन चतुर्विधानाम् । तत्र ये क्लेशाश्चित्तभूमौ स्थिताः प्रबोधाभावे स्वकार्यं नारभन्ते ते प्रसुप्ताः, तनवः सूक्ष्माः, परस्परमितरोत्कर्षे विच्छिन्नाः, ये स्वं स्वं कार्यमभिनिर्वर्तयन्ति ते उदाराः, तेषाम् ॥ ४ ॥

अविद्यालक्षणमाह—

अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ॥ ५ ॥

---

१ 'पञ्च' इति पाठो विज्ञानभिक्षारेसम्मतः ।

अतस्मिंस्तदिति प्रतिभासोऽविद्येत्यविद्यालक्षणम् । घटकायदुःखशरीरेषु नित्यशुचिसुखात्मत्वाभिमानोऽविद्या ॥ ५ ॥

अस्मितालक्षणमाह—

दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ॥ ६ ॥

दृक्छक्तिः पुरुषः, दर्शनशक्तिरन्तःकरणस्य सात्त्विकः परिणामः, तयोर्भोक्तृत्वेन भिन्नत्वेऽप्येकताभिमानोऽस्मिता ॥ ६ ॥

रागलक्षणमाह—

सुखानुशयी रागः ॥ ७ ॥

सुखमनुशेत इति सुखानुशयी रागः, सुखज्ञस्य तदनुस्मृतिपूर्वकः सुखसाधनेषु गर्धः क्लेशः ॥ ७ ॥

द्वेषलक्षणमाह—

दुःखानुशयी द्वेषः ॥ ८ ॥

उक्तलक्षणदुःखाभिज्ञस्यानुस्मृतिपूर्वकस्तत्साधनेष्वनभिलाषतो निन्दात्मको द्वेषलक्षणः क्लेशः ॥ ८ ॥

अभिनिवेशलक्षणमाह—

स्वरसवाही विदुषोऽपि तन्वनुबन्धो-ऽभिनिवेशः ॥ ९ ॥

पूर्वजन्मानुभूतमरणदुःखवासनाबलाज्जायमानः शरीरादिभिर्मम वियोगो मा भूदिति तन्वनुबन्धरूपः सर्वेषामभिनिवेशः ॥ ९ ॥

क्रियायोगेन सूक्ष्मीभूतानां क्लेशानां त्यागमाह—

ते प्रतिप्रसवहेयाः सूक्ष्माः ॥ १० ॥

ते सूक्ष्माः क्लेशाः प्रतिलोमपरिणामेन हेयास्त्यक्तव्याः ॥ १० ॥

तद्वृत्तीनामपि त्यागमाह—

ध्यानहेयास्तद्वृत्तयः ॥ ११ ॥

तेषां वृत्तयः सुखाद्याः । ता ध्यानेन चित्तैकाग्र्येण हेयाः ॥ ११ ॥

क्लेशत्वहेतुभूतं कर्माद्याह—

क्लेशमूलः कर्माशयो दृष्टादृष्टजन्म-वेदनीयः ॥ १२ ॥

---

१ 'तन्वनुबन्धः' इत्यत्र 'तथारूढः' इति भाष्यसम्मतः पाठः ।

अविद्यादिक्लेशमूला वासना अस्मिञ्जन्मन्यनुभवनीया जन्मान्तरे वा ॥ १२ ॥

अविद्यायाः फलमाह—

सति मूले तद्विपाको जात्यायुर्भोगाः ॥ १३ ॥

अविद्यादौ सति कर्मणां विपाकः फलं जात्यायुर्भोगाः । ब्राह्मणत्वादिर्जातिः, चिरकालमायुः, भोगा विषयाः ॥१३॥

ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥ १४ ॥

ते पूर्वोक्ताः (जात्यायुर्भोगाः) पुण्यापुण्यहेतुत्वात्सुखदुःखफला भवन्ति । एतच्च सर्वसाधारणम् ॥ १४ ॥

योगिनो भोगसाधनं दुःखायेत्याह—

परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ॥ १५ ॥

योगिनस्तु ज्ञातक्लेशादिविवेकस्य सकलमेव भोगसाधनं

परिणामतापसंस्कारदुःखैः साविषान्नवदादावन्ते मध्ये भोगकालेऽपि प्रतिकूलवेदनीयमेव ॥ १५ ॥

अतस्तदुपायमाह—

हेयं दुःखमनागतम् ॥ १६ ॥

भूतस्य व्यतिक्रान्तत्वादनुभूयमानस्य च त्यक्तुमशक्यत्वादनागतमेव संसारदुःखं हातव्यम् ॥ १६ ॥

हेयहेतुमाह—

द्रष्टृदृश्ययोः संयोगो हेयहेतुः ॥ १७ ॥

द्रष्टा चिद्रूपः पुरुषः, दृश्यं बुद्धितत्त्वम् ; तयोर्विवेकाख्यातिपूर्वको योऽसौ संयोगो भोक्तृभोग्यत्वेन संनिधानम्, स हेयस्य दुःखस्य संसारस्य हेतुः कारणम् ॥ १७ ॥

दृश्यस्य स्वरूपं कार्यं प्रयोजनं चाह—

प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ॥ १८ ॥

प्रकाशः सत्त्वस्य धर्मः, क्रिया प्रवृत्तिरूपा रजसः, स्थितिर्नियमरूपा तमसः, एताः स्वरूपं यस्य; भूतानीन्द्रियाणि च आत्मा स्वरूपाभिन्नः कार्याख्यः परिणामो यस्य;

भोगः, अपवर्गः संसारनिवृत्तिः, तावर्थः प्रयोजनं यस्य तथाविधं दृश्यम् ॥ १८ ॥

दृश्यगुणानां पर्वाण्याह—

विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि ॥ १९ ॥

गुणानां पर्वाण्यवस्थाविशेषरूपाणि चत्वारि ज्ञातव्यानि । विशेषा महाभूतेन्द्रियाणि; अविशेषास्तन्मात्रान्तःकरणे; लिङ्गमात्रं बुद्धिः; अलिङ्गमव्यक्तम् ॥ १९ ॥

द्रष्टुः स्वरूपमाह—

द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥ २० ॥

द्रष्टा पुरुषो दृशिमात्रश्चेतनामात्रस्वरूपः । स शुद्धोऽपि प्रत्ययानुपश्यः प्रत्ययान्विषयोपरक्तज्ञानानि अव्यवधानेन पश्यतीति संनिधानमात्रेण बुद्धौ विषयोपरागे सति पुरुषस्य द्रष्टृत्वम् ॥ २० ॥

दृश्यस्वरूपमाह—

तदर्थ एव दृश्यस्यात्मा ॥ २१ ॥

उक्तलक्षणस्य दृश्यस्यात्मा स्वरूपं तदर्थः पुरुषस्य भोक्तृत्वसंपादनमेव प्रयोजनं यस्य ॥ २१ ॥

कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥ २२ ॥

यद्यपि विवेकख्यातिपर्यन्ताद्भोगसंपादनात्कमपि कृतार्थं पुरुषं प्रति तन्नष्टम्, तथापि सर्वपुरुषसाधारणत्वादन्यान्प्रत्यनष्टव्यापारमवतिष्ठते । अतस्तदविनाशादेकमुक्तौ न सर्वमुक्तिप्रसङ्गः ॥ २२ ॥

दृष्टृदृश्ययोः संयोगमाह—

स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥ २३ ॥

स्वशक्तिर्दृश्यस्वभावः, स्वामिशक्तिर्द्रष्टृस्वरूपम् ; तयोर्द्वयोर्या स्वरूपोपलब्धिः, तस्याः कारणं यः स संयोगः । स च स्वरूपानतिरिक्तः, नित्यव्यापकयोः संबन्धासंभवात्, भोक्तृभोग्यरूपः स्वरूपसंबन्ध एव ॥ २३ ॥

तद्धेतुमाह—

तस्य हेतुरविद्या ॥ २४ ॥

या पूर्वोक्ताऽविद्या सा तस्य संयोगस्य कारणं भवति ॥ २४ ॥

कैवल्यस्वरूपमाह—

तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम् ॥ २५ ॥

तस्या ज्ञानोन्मूलिताया अविद्याया योऽभावः, तस्मिन् सति तत्कार्यसंयोगस्याप्यभावः । तदेव तद्धानं, तदेव दृशेः पुरुषस्य कैवल्यमिति ॥ २५ ॥

तदुपायमाह—

विवेकख्यातिरविप्लवा हानोपायः ॥ २६ ॥

पुरुषगुणभेदविवेकस्य या ख्यातिः प्रख्या अविप्लवा विगतोऽन्तराव्युत्थानरूपो विप्लवो यस्याः सा हानस्य दृश्यपरित्यागस्योपायः ॥ २६ ॥

विवेकख्यातेः स्वरूपमाह—

तस्य सप्तधा प्रान्तभूमौ प्रज्ञा ॥ २७ ॥

तस्योत्पन्नविवेकज्ञानस्य ज्ञातव्यविवेकरूपा प्रज्ञा प्रान्तभूमौ सालम्बनसमाधिभूमिपर्यन्तं सप्तप्रकारा भवति। ते प्रकाराः 'ज्ञातं मया ज्ञेयम्' इत्यादयः ॥ २७ ॥

---

१ 'प्रान्तभूमिः' इति सर्वसम्मतं पाठान्तरम् ।

विवेकख्यातेः साधनमाह—

योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिरा विवेकख्यातेः ॥ २८ ॥

वक्ष्यमाणयोगाङ्गानुष्ठानादा विवेकख्यातेरशुद्धिक्षये चित्तसत्त्वावरणरूपाशुद्धिक्षये या ज्ञानदीप्तिः सात्त्विकः परिणामो विवेकख्यातिपर्यन्तः, स तस्याः ख्यातेर्हेतुः॥२८॥

अष्टौ योगाङ्गानि ।

कानि तानि योगाङ्गानीत्यपेक्षायां तान्याह—

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ॥ २९ ॥

तेषां व्याख्याऽग्रिमसूत्राणि ॥ २९ ॥

(१) तानि क्रमेण दर्शयन्यमभेदानाह—

तत्रा[1]हिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ॥ ३० ॥

---

१ 'तत्र' इति शब्दान्वितः पाठ एतट्टीकाप्रणेतुरसम्मत एव।

तत्र प्राणवियोगहेतुर्व्यापारो हिंसा, तदभावोऽहिंसा। सत्यं वाङ्मनसयोर्यथार्थत्वम् । अस्तेयं परस्वापहरणाभावः। ब्रह्मचर्यमुपस्थसंयमः । अपरिग्रहो भोगसाधनानामस्वीकरणम् । एते पञ्च यमाः ॥ ३० ॥

तेषां विशेषं दर्शयन् महाव्रतत्वमाह—

एते जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् ॥ ३१ ॥

जातिर्ब्राह्मणत्वादिः, देशस्तीर्थादिः, कालश्चतुर्दश्यादिः, समयो ब्राह्मणप्रयोजनादिः, एतैरनवच्छिन्ना अहिंसादयः सार्वभौमाः सर्वासु चित्तभूमिषु भवा महाव्रतमित्युच्यन्ते ॥ ३१ ॥

(२) नियमभेदानाह—

शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥ ३२ ॥

शौचं द्विधा—मृजलादिभिर्बाह्यं कायप्रक्षालनम्, आन्तरं मैत्र्यादिभिश्चित्तप्रसादनम्; संतोषस्तुष्टिः, शेषाः प्राग्व्याख्याताः, एते नियमाः ॥ ३२ ॥

---

१ 'एते' इति भाष्यासम्मतः पाठः ।

तेषां योगाङ्गत्वं दर्शयन् सुकर्मणि विघ्नानामवश्यम्भावित्वादहिंसादियमानां नाशे प्राप्ते तन्निरसनार्थमाह—

वितर्कबाधने प्रतिपक्षभावनम् ॥३३॥

वक्ष्यमाणवितर्कप्रतिपक्षभावने सति योगः सुकरो भवति । एते वितर्कबाधकाः ॥ ३३ ॥

वितर्कान् कथयन् तत्स्वरूपभेदहेत्वादीनाह—

वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम् ॥ ३४ ॥

पूर्वोक्ता हिंसादयो वितर्काः कृतकारितानुमोदितभेदेन त्रिधा । कारणमाह—लोभक्रोधमोहपूर्वका इति । पुनस्त्रैविध्यम्—मृदुमध्याधिमात्राः । तेषां फलमाह—दुःखाज्ञानानन्तफला इति ॥ ३४ ॥

तेषां यमानामभ्यासोत्कर्षाद्याः सिद्धयो भवन्ति, ता आह—

अहिंसाप्रतिष्ठायां तत्संनिधौ वैरत्यागः ॥ ३५ ॥

तस्याहिंसां भावयतः संनिधौ सहजविरोधिनामप्यहि-नकुलादीनां वैरत्यागः ॥ ३५ ॥

सत्याभ्यासोत्कर्षस्य फलमाह—

सत्यप्रतिष्ठायां क्रियाफला-श्रयत्वम् ॥ ३६ ॥

सत्यप्रतिष्ठायां यागादिक्रियाफलाश्रयत्वं नाम अकृत्वापि यागादिक्रियास्तद्वचनादन्यस्यापि स्वर्गादिफलदानसामर्थ्य-मायति; किं पुनस्तस्य वक्तव्यम् ? ॥ ३६ ॥

अस्तेयप्रतिष्ठायां सर्वरत्नोप-स्थानम् ॥ ३७ ॥

अस्तेयं यदाऽभ्यस्यति योगी तदा तस्य प्रकर्षान्निरभि-लाषस्यापि सर्वतो रत्नान्युपतिष्ठन्ते ॥ ३७ ॥

ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ॥ ३८॥

यः किल ब्रह्मचर्यमभ्यस्यति तस्य तत्प्रकर्षान्निरतिशयं वीर्यं सामर्थ्यमाविर्भवति । वीर्यनिरोधो हि ब्रह्मचर्यम् । तस्य प्रकर्षाच्छरीरेन्द्रियमनस्सु वीर्यं प्रकर्षमा-गच्छति ॥ ३८ ॥

अपरिग्रहस्थैर्ये जन्मकथन्तासंबोधः ॥ ३९ ॥

साधनपरिग्रह एव परिग्रहो न; किंतु शरीरपरिग्रहोऽपि । तस्मिन्सति बहिर्मुखवृत्तौ न ज्ञानोद्भवः । अपरिग्रहस्थैर्ये, कथमित्यस्य भावः कथंता, जन्मनः कथंता जन्मकथंता, तस्याः संबोधः सम्यग्ज्ञानम् । 'जन्मान्तरे कोऽहमासम्' इत्यादि सर्वं जानातीत्यर्थः ॥ ३९ ॥

(२) नियमानां फलानि दर्शयति । तत्रादौ शौचस्य फलान्याह—

शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः ॥ ४० ॥

यः किल शौचं भावयति, तस्य कारणपर्यालोचनया स्वाङ्गेष्वपि जुगुप्सा घृणा जायते 'नात्राग्रहः कार्योऽशुचित्वात्' इति । ततश्च परैः कायवद्भिः सह संसर्गाभाव उपजायते ॥ ४० ॥

सत्त्वशुद्धिसौमनस्यैकाग्रतेन्द्रियजयात्मदर्शनयोग्यत्वानि च ॥ ४१ ॥

---

१ 'सत्त्वशुद्धौ' 'ऐकाग्र्य–' इति च भाष्यसंमतः पाठः

सत्त्वं प्रकाशात्मकम्, तस्य शुद्धी रजस्तमोभ्यामनभिभवः; सौमनस्यं मानसी प्रीतिः; एकाग्रता चेतसः स्थैर्यम्; इन्द्रियजयो विषयपराङ्मुखत्वेनात्मन्यवस्थापनम्; आत्मनो दर्शने चित्तस्य समर्थत्वम्, एते क्रमेण प्रादुर्भवन्ति ॥ ४१ ॥

संतोषफलमाह—

संतोषादनुत्तमसुखलाभः ॥ ४२ ॥

संतोषप्रकर्षे योगिनस्तथाविधमान्तरं सुखमाविर्भवति, यस्य बाह्यं सुखं शतांशेनापि न समम् ॥ ४२ ॥

तपसः फलमाह—

कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥ ४३ ॥

तपः समभ्यस्यमानं चेतसः क्लेशादिलक्षणाशुद्धिक्षयद्वारेण कायेन्द्रियाणां सिद्धिमुत्कर्षमादधाति । इन्द्रियाणां सूक्ष्मव्यवहितादिदर्शनसामर्थ्यम्, कायस्याणुत्वमहत्त्वादि यथेच्छम् ॥ ४३ ॥

स्वाध्यायफलमाह—

स्वाध्यायादिष्टदेवतासंप्रयोगः ॥ ४४ ॥

मन्त्रजपादिलक्षणे स्वाध्याये प्रकृष्यमाणे इष्टया देवतया संप्रयोगः । सा देवता प्रत्यक्षीभवतीत्यर्थः ॥ ४४ ॥

ईश्वरप्रणिधानफलमाह—

समाधिसिद्धिरीश्वरप्रणिधानात् ॥४५॥

ईश्वरे योऽयं भक्तिविशेषस्तस्मात्समाधेराविर्भावो भवति, यस्मादीश्वरः प्रसन्नः सन्नन्तरायक्लेशानपहृत्य समाधिमुद्बोधयति ॥ ४५ ॥

(३) आसनलक्षणमाह—

स्थिरसुखमासनम् ॥ ४६ ॥

आस्यतेऽनेनेत्यासनं पद्मस्वस्तिकादि । तद्यदा स्थिरं निष्कम्पं सुखमनुद्वेजनीयं भवति, तदा योगाङ्गम् ॥ ४६ ॥

तत्स्थैर्योपायमाह—

प्रयत्नशैथिल्यानन्त्यसमापत्तिभ्याम् ॥ ४७ ॥

तदासनं प्रयत्नशैथिल्येनाक्लेशेन, आकाशगतानन्त्यसमापत्त्या च स्थितम् ॥ ४७ ॥

तत्सिद्धेः फलमाह—

ततो द्वन्द्वानभिघातः ॥ ४८ ॥

तस्मिन्नासनजये सति योगी द्वन्द्वैः शीतोष्णादिभिर्नाभिहन्यत इत्यर्थः ॥ ४८ ॥

(४) प्राणायामलक्षणमाह—

तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥ ४९ ॥

आसनस्य स्थैर्ये सति, प्राणायामोऽनुष्ठेयः श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः । विच्छेदो धारणम् ॥ ४९ ॥

तस्यैव विभज्य भेदपूर्वकं रूपं कथयति—

स तु बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मः ॥ ५० ॥

स तु बाह्यवृत्ती रेचकः, आभ्यन्तरवृत्तिः पूरकः, स्तम्भवृत्तिः कुम्भकः; त्रिविधोऽयं देशेन द्वादशाङ्गुलप्रमाणेन, कालेन षट्त्रिंशन्मात्रादिना, संख्यया 'इयतो वारान्कृतः' इति भेदेनोपलक्षितो दीर्घसूक्ष्मसंज्ञो भवति ॥ ५० ॥

---

१ 'स तु' इति पदद्वयं राजमार्तण्डभोजवृत्त्योर्मूलेऽधिकम् ।

त्रीन्प्राणायामानभिधाय चतुर्थमाह—

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ॥ ५१ ॥

द्वादशान्तादिर्बाह्यः, हृदयादिराभ्यन्तरः, तौ द्वावाक्षिप्य पर्यालोचयतः यः स्तम्भः गतिविच्छेदः, स चतुर्थः। पूर्वस्मादेतस्य निरोध एव विशेषः ॥ ५१ ॥

प्राणायामफलमाह—

ततः क्षीयते प्रकाशावरणम् ॥ ५२ ॥

तस्मात्प्राणायामात्प्रकाशस्य चित्तसत्त्वगतस्य यदावरणं क्लेशरूपं तत्क्षीयत इत्यर्थः ॥ ५२ ॥

फलान्तरमाह—

धारणासु च योग्यता मनसः ॥ ५३ ॥

वक्ष्यमाणा धारणाः, तासु प्राणायामैः क्षीणदोषं मनो यत्र धार्यते तत्र स्थिरं भवति, न विक्षेपं भजते ॥ ५३ ॥

(५) प्रत्याहारस्य लक्षणमाह—

[1]स्वस्वविषयसंप्रयोगाभावे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ॥ ५४ ॥

इन्द्रियाणां विषयाभिमुख्येन वर्तनं यत्, तत्परित्यज्य स्वरूपमात्रेऽवस्थानम् 'इन्द्रियाणि स्वस्वविषयेभ्यः प्रतीपमाह्रियन्तेऽस्मिन्' इति प्रत्याहारः । तस्मिन्सति, इन्द्रियाणि चित्तस्वरूपमात्रानुकारीणि सन्ति ॥ ५४ ॥

प्रत्याहारफलमाह—

ततः परमावश्यतेन्द्रियाणाम् ॥ ५५ ॥

अभ्यस्यमाने हि प्रत्याहारे तथा वश्यान्यायत्तानीन्द्रियाणि संपद्यन्ते, यथा बाह्यविषयाभिमुख्यं नीयमानान्यपि न यान्तीत्यर्थः । तदयं योगपदार्थो यमादिभिः प्राप्तबीजभावः आसनादिभिरङ्कुरितः प्रत्याहारेण कुसुमितः ध्यानधारणासमाधिभिः फलिष्यतीत्यर्थः ॥ ५५ ॥

इति श्रीपातञ्जलयोगदर्शने द्वितीयः पादः ।

---

१. 'स्वविषयासंप्रयोगे' इति भाष्यानुगतः पाठः ।

विभूतिपादः ३।

एवं साधनपादान्ते संप्रज्ञातसमाधेर्यमादीनि बाह्या-
ङ्गान्युक्त्वा तदन्तराङ्गानि दर्शयति । तत्र—

(६) धारणालक्षणमाह—

देशबन्धश्चित्तस्य धारणा ॥ १ ॥

देशे नाभिचक्रादौ चित्तस्य बन्धो विषयान्तरपरिहारेण
यत्स्थिरीकरणम्, सा चित्तस्य धारणेत्युच्यते । यमनिय
मासनप्राणायामप्रत्याहारसिद्ध्युत्तरं निर्बाधे देशे काये
जितद्वन्द्वेन संप्रज्ञातसमाधेरभ्यासाय चेतसः स्थिरीकरण
कर्तव्यम् ॥ १ ॥

(७) ध्यानलक्षणमाह—

तत्र प्रत्ययैकतानता ध्यानम् ॥ २ ॥

तत्र तस्मिन्देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ज्ञान
या एकतानता विसदृशपरिणामपरिहारद्वारेण यदेव धा
णायामालम्बनीकृतं तदालम्बनतयैव निरन्तरमुत्पत्तिः,
ध्यानमुच्यते ॥ २ ॥

(८) समाधिलक्षणमाह—

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥ ३ ॥

तदेव ध्यानं यदर्थमात्रनिर्भासमर्थाकारसमावेशादुद्भूतार्थरूपमभ्युतज्ञानस्वरूपत्वेन स्वरूपशून्यतामिवापद्यते, स समाधिरित्युच्यते । सम्यगाधीयते एकाग्रीक्रियते यत्र मनः स समाधिः ॥ ३ ॥

योगाङ्गत्रयस्य तान्त्रिकीं संज्ञामाह—

त्रयमेकत्र संयमः ॥ ४ ॥

एकस्मिन्विषये धारणाध्यानसमाधिलक्षणं त्रितयं प्रवर्तमानं संयमसंज्ञया शास्त्रे व्यवह्रियते ॥ ४ ॥

संयमस्य फलमाह—

तज्जयात्प्रज्ञालोकः ॥ ५ ॥

तस्य संयमस्य जयादभ्यासेन सात्म्योत्पादनात्प्रज्ञाया ज्ञातव्यविवेकस्वरूपाया आलोकः प्रसरो भवति ॥ ५ ॥

तस्योपयोगमाह—

तस्य भूमिषु विनियोगः ॥ ६ ॥

तस्य संयमस्य भूमिषु स्थूलसूक्ष्मालम्बनभेदेन स्थितासु चित्तवृत्तिषु विनियोगः कार्यः। अधरां जित्वा उत्तरां जयेत् ॥ ६ ॥

योगाङ्गत्रयस्यात्र निरूपणे हेतुमाह—

त्रयमन्तरङ्गं पूर्वेभ्यः ॥ ७ ॥

पूर्वेभ्यो यमादियोगाङ्गेभ्यः पारम्पर्येण समाधेरुपकारकेभ्यः धारणादियोगाङ्गत्रयं संप्रज्ञातस्य समाधेरन्तरङ्गम्, समाधिस्वरूपनिष्पादनात् ॥ ७ ॥

तस्यापि निर्बीजसमाध्यन्तरापेक्षया बहिरङ्गत्वमाह—

तदपि बहिरङ्गं निर्बीजस्य ॥ ८ ॥

निर्बीजस्य निरालम्बनस्य समाधेः तदपि योगाङ्गत्रयं बहिरङ्गम्, पारम्पर्येणोपकारकत्वात् ॥ ८ ॥

व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥ ९ ॥

व्युत्थानं क्षिप्तादिभूमित्रयम्, निरोधः प्रकृष्टसत्त्वश्चेतसः परिणामः, ताभ्यां जातौ यौ संस्कारा, तयोर्यथाक्रममभि-

भवप्रादुर्भावौ यदा भवतः, तदा निरोधक्षणे चित्तस्योभयवृत्तित्वादन्वयो यः स निरोधपरिणाम इत्युच्यते ॥ ९ ॥

निरोधसंस्कारपरिणाममाह—

तस्य प्रशान्तवाहिता संस्कारात्॥१०॥

तस्य चेतस उक्तान्निरोधसंस्कारात्प्रशान्तवाहिता भवति, सदृशप्रवाहपरिणामि चित्तं भवतीत्यर्थः ॥ १० ॥

उद्रिक्तचित्तस्य समाधिपरिणाममाह—

सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ॥ ११ ॥

चित्तस्य सर्वार्थता विक्षेपो धर्मः, एकाग्रतापि धर्मः, तयोर्यथाक्रमं क्षयोदयावभिभवप्रादुर्भावौ, उद्रिक्तसत्त्वस्य चित्तस्योभयत्रान्वयितयाऽवस्थानं समाधिपरिणाम इत्युच्यते। पूर्वस्मादस्यायं विशेषः—तत्र व्युत्थानसंस्कारस्य न्यग्भावः निरोधसंस्कारस्योद्भवः; इह तु क्षयोदयौ, सर्वार्थतारूपस्य विक्षेपस्यात्यन्ततिरस्कारादनुत्पत्तिः एकाग्रतारूपधर्मस्योद्भव इति॥ ११॥

धर्मिणश्चित्तस्यैकाग्रतापरिणाममाह—

(ततः[1] पुनः) शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ॥ १२ ॥

समाहितचित्तस्य एको वृत्तिविशेषः शान्तः, अपरस्तु उदितो वर्तमानः; द्वावपि समाहितचित्तत्वेन तुल्यौ एकरूपावलम्बनत्वेन सदृशौ; उभयत्रापि समाहितचित्तस्यान्वयित्वेनायमेकाग्रतापरिणाम इत्युच्यते ॥ १२ ॥

चित्तपरिणामस्य त्रैविध्यमाह—

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥ १३ ॥

एतेन त्रिविधोक्तचित्तपरिणामेन भूतेषु स्थूलसूक्ष्मेषु इन्द्रियेषु बुद्धिकर्मभेदेन स्थितेषु धर्मलक्षणावस्थाभेदेन त्रिविधः परिणामो व्याख्यातोऽवगन्तव्यः। अवस्थितस्य धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तरापत्तिः परिणामः। यतश्चलं गुणवृत्तं नापरिणममानं क्षणमप्यस्ति ॥ १३ ॥

---

१. 'ततः पुनः' इति पदद्वयं व्यासभाष्येऽधिकम्।

त्रिविधपरिणामाश्रयि धर्मिलक्षणमाह—

शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी ॥ १४ ॥

शान्ता ये कृतस्वस्वव्यापाराः, उदिता ये स्वस्वव्यापारं कुर्वन्ति, अव्यपदेश्या ये शक्तिस्वरूपेण स्थिताः, तेषां शक्तिर्धर्मः। तं त्रिविधं धर्मं योऽनुवर्तते स्वीकरोति स धर्मीत्युच्यते, यथा सुवर्णमनेकभूषणाकारं भवति ॥ १४॥

एकस्यानेकपरिणामे हेतुमाह—

क्रमान्यत्वं परिणामान्यत्वे हेतुः॥१५॥

धर्माणामुक्तानां यः क्रमः, तस्य यत्प्रतिक्षणमन्यत्वम् तत्परिणामस्यान्यत्वे नानाविधत्वे हेतुः, यथा मृदो घटादिः ॥ १५ ॥

इदानीं संयमस्य सिद्धीः प्रतिपादयति—

परिणामत्रयसंयमादतीतानागतज्ञानम् ॥ १६ ॥

धर्मलक्षणावस्थाभेदेन यत्परिणामत्रयमुक्तं तत्र संयमात् तस्मिन्विषये पूर्वोक्तसंयमकरणादतीतानागतज्ञानं यो-

गिनः। चेतसः शुद्धसत्त्वप्रकाशरूपत्वाद्भूतादि सर्वं योगी जानाति ॥ १६ ॥

सर्वभूतरुतज्ञाने हेतुमाह—

शब्दार्थप्रत्ययानामितरेतराध्यासात् संकरस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम् ॥ १७ ॥

शब्दो वर्णध्वनिरूपः, अर्थो जातिगुणक्रियादिः, प्रत्ययो ज्ञानम्; एषामितरेतराध्यासाद्बुद्ध्येकरूपतासंपादनात्संकीर्णत्वम्। तेषां प्रविभागं विधाय तस्मिन्प्रविभागे यः संयमं करोति, तस्य सर्वेषां मृगपश्वादीनां यद्रुतं शब्दस्तस्य ज्ञानमुत्पद्यते ॥ १७ ॥

प्राक्तनजन्मस्मरणे हेतुमाह—

संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् ॥ १८ ॥

द्विविधा वासनासंस्काराः। केचित्स्मृत्युत्पादनफला केचिज्जात्यायुर्भोगहेतवो धर्माधर्माख्याः। तेषु संयमं यदा करोति, तदा भावनयैव पूर्ववृत्तानुसंधानादुद्बुद्धसंस्काराः

सर्वमतीतं पूर्वजन्मानुभूतजात्यादिकं प्रत्यक्षेण पश्यति ॥ १८ ॥

परचित्तज्ञाने कारणमाह—

प्रत्ययस्य परचित्तज्ञानम् ॥ १९॥

प्रत्ययस्य परिचितस्य केनचिन्मुखरागादिलिङ्गेन गृहीतस्य यदा संयमं करोति, तदा परकीयचित्तस्य ज्ञानमुत्पद्यते सरागं विरागं वेति ॥ १९ ॥

अस्यैव विशेषमाह—

[न[1] च तत्सालम्बनं तस्याविषयी-भूतत्वात् ॥ २० ॥

तस्य परस्य यच्चित्तं तत् सालम्बनं स्वकीयालम्बनेन सहितं न शक्यते ज्ञातुम्, आलम्बनस्य केनचिल्लिङ्गेनाविषयीकृतत्वात्, यच्च न गृहीतं तत्र संयमस्य कर्तुमशक्यत्वात् । चित्तधर्मज्ञानं तु भवत्येव, तत्संयमस्य कर्तुं शक्यत्वात् ॥ २० ॥]

---

१ इदं भाष्यमेव, न सूत्रमिति विज्ञानभिक्षुः, भाष्ये तथादर्शनात्। परंतु भोजराजवाचस्पतिभ्यां सूत्रत्वेनोपात्तम्। चिन्त्यमेतत्।

अन्तर्धानसिद्धिमाह—

कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंयोगेऽन्तर्धानम् ॥ २१ ॥

कायस्य यद्रूपं तस्य संयमात् रूपस्य चक्षुर्ग्राह्यत्वरूपशक्त्याः स्तम्भे प्रतिबन्धे, चक्षुःप्रकाशः सत्त्वधर्मः तस्या संयोगे तद्ग्रहणाभावे, योगिनोऽन्तर्धानं भवति; न केनचिदसौ दृश्यते ॥ २१ ॥

[¹एतेन शब्दाद्यन्तर्धानमुक्तम् ॥२२॥

एतेन रूपाद्यन्तर्धानोपायप्रदर्शनेन शब्दादीनां श्रोत्रादिग्राह्याणामन्तर्धानमुक्तं वेदितव्यम् ॥ २२ ॥]

सिद्ध्यन्तराणि कथयन्नादौ मरणारिष्टज्ञानसिद्धिमाह—

सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा॥२३॥

---

१ एतत्सूत्रं भोजराजेन व्याख्यातम् । परं तु विज्ञानभिक्षुकृतयोगवार्तिकपर्यालोचनायां भाष्यकारेण सूत्रतया नैतदङ्गीकृतमिति भाति ।

यत्पूर्वकृतं कर्म तद्विविधम्—एकं फलजननायोपक्रमेण कार्यकरणाभिमुख्येन सह वर्तत इति सोपक्रमम्, अपरमुक्तरूपविपरीतं निरुपक्रमम् । तस्मिन्द्विविधे कर्मणि यः संयमं करोति किं कर्म शीघ्रविपाकं किं चिरविपाकमिति, एवं ध्यानदार्ढ्यादपरान्तज्ञानमस्योत्पद्यते । अपरान्तः शरीरवियोगः । तज्ज्ञानममुष्मिन्देशे काले वा शरीरवियोगो भविष्यातीति । अरिष्टेभ्यो वा । आध्यात्मिकादीनि त्रिविधान्यरिष्टानि पिहिते कर्णे घोषाश्रवणं विकृतपुरुषदर्शनं स्वर्गादिपदार्थदर्शनमित्येतादृशानि, तेभ्यः शरीरवियोगकालं जानाति । अयोगी संशयेन, योगी तु निश्चयेन जानातीत्युभयोर्भेदः ॥ २३ ॥

बलोत्पादकाः सिद्धीराह--

मैत्र्यादिषु बलानि ॥ २४ ॥

मैत्र्यादिषु विहितो यः संयमः तस्य बलानि मैत्र्यादीनां संबन्धीनि प्रादुर्भवन्ति । मैत्र्याद्युत्कर्षे असौ सर्वस्य मित्रत्वादिकं प्रतिपद्यते ॥ २४ ॥

बलेषु हस्तिबलादीनि ॥ २५ ॥

हस्त्यादिबलेषु कृतसंयमस्य हस्त्यादिबलान्याविर्भवन्ति ॥ २५ ॥

सूक्ष्म–व्यवहित–विप्रकृष्ट–वस्तुज्ञानसिद्धिमाह—

प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहित-विप्रकृष्टज्ञानम् ॥ २६ ॥

विषयवतीज्योतिष्मतीरूपप्रवृत्तौ य आलोकः प्रकाशः, तस्य सर्वविषयेषु न्यासात्तेषां भावनात् अन्तःकरणेन्द्रियेषु सूक्ष्म-व्यवहित-विप्रकृष्ट-परमाणु-निधान-रसायनादेर्ज्ञानमुत्पद्यते ॥ २६ ॥

भुवनसाक्षात्कारज्ञानमाह—

भुवनज्ञानं सूर्ये संयमात् ॥ २७ ॥

सूर्ये यः संयमं करोति, तस्य भूर्भुवरादिसप्तभुवनज्ञानमुत्पद्यते ॥ २७ ॥

नक्षत्रसन्निवेशसाक्षात्करणमाह—

चन्द्रे ताराव्यूहज्ञानम् ॥ २८ ॥

चन्द्रे संयमात् ताराणां व्यूहः सन्निवेशः तज्ज्ञानमुत्पद्यत इत्यर्थः ॥ २८ ॥

---

१ व्यवहितं पृथिव्यंतर्गतं वस्तु। २ विप्रकृष्टं दूरगतं वस्तु।

तारागतिज्ञानसिद्धिमाह—

ध्रुवे तद्गतिज्ञानम् ॥ २९ ॥

ध्रुवे निश्चले कृतसंयमस्य तासां ताराणां गतिज्ञानमुत्पद्यते,—इयं तारा अयं ग्रहः इयत्कालेन गच्छतीति ॥२९॥

कायसन्निवेशरूपां सिद्धिमाह—

नाभिचक्रे कायव्यूहज्ञानम् ॥ ३० ॥

षोडशारे नाभिचक्रे कृतसंयमस्य, काये यो व्यूहो विशिष्टरसमलधातुनाड्याद्यवस्थानं तस्य ज्ञानमुत्पद्यते ॥ ३० ॥

क्षुत्पिपासानिवृत्तिरूपां सिद्धिमाह—

कण्ठकूपे क्षुत्पिपासानिवृत्तिः॥ ३१॥

कण्ठे गले कूपः कण्ठकूपो जिह्वातोऽधस्ताद्गर्ताकारः प्रदेशः। तत्स्पर्शात्प्राणादीनां क्षुधाद्या भवन्ति । तस्मिन् कृतसंयमस्य क्षुत्पिपासादयो निवर्तन्ते ॥ ३१ ॥

चेतःस्थैर्योत्पादकज्ञानसिद्धिमाह—

कूर्मनाड्यां स्थैर्यम् ॥ ३२ ॥

कण्ठकूपस्याधस्ताद्या कूर्माख्या नाडी, तस्यां कृतसंयमस्य चेतसः स्थैर्यमुत्पद्यते ॥ ३२ ॥

दिव्यपुरुषदर्शनसिद्धिमाह—

मूर्धज्योतिषि सिद्धदर्शनम् ॥ ३३ ॥

शिरःकपाले ब्रह्मरन्ध्राख्यं छिद्रं प्रकाशाधारत्वात् भास्वरं ज्योतिः। तस्मिन्कृतसंयमस्य सिद्धानां दर्शनं भवति ॥ ३३ ॥

सर्वज्ञतासिद्धिमाह—

प्रातिभाद्वा सर्वं [सर्वनिमित्तानपेक्षम्] ॥ ३४ ॥

यथार्थं द्रागुत्पद्यमानं ज्ञानं प्रतिभा। तस्यां संयमे क्रियमाणे प्रातिभं तारकं ज्ञानमुदेति। [तस्मिन्सति संयमान्तरानपेक्षः सर्वं जानातीत्यर्थः] ॥ ३४ ॥

स्वपरचित्तज्ञानसिद्धिमाह—

हृदये चित्तसंवित् ॥ ३५ ॥

हृदयपुण्डरीकान्तःकृतसंयमस्य स्वपरचित्तज्ञानमुत्पद्यते। स्वपरचित्तगतं सर्वं जानातीत्यर्थः ॥ ३५ ॥

पुरुषसाक्षात्कारसिद्धिमाह—

सत्त्वपुरुषयोरत्यन्तासंकीर्णयोः

---

१ 'प्रातिभाद्वा सर्वम्' एतावानेव भाष्यानुकूलः पाठः।

प्रत्ययाविशेषो भोगः परार्थात्[1] संयमात् पुरुषज्ञानम्॥ ३६॥

सत्त्वं प्रकाशसुखात्मकः प्राधानिकः परिणामः, पुरुषो भोक्ता तयोश्चेतनाचेतनत्वादत्यन्तासंकीर्णयोः प्रत्ययस्याविशेषात्सुखसंविद्भोगः। परार्थादन्यः स्वार्थः। तत्राहंकाररहितचितौ कृतसंयमस्य पुरुषज्ञानमुत्पद्यते॥ ३६॥

अस्य फलमाह—

ततः प्रातिभश्रावणवेदनादर्शा[2]स्वादवार्ता जायन्ते॥ ३७॥

ततः पुरुषसंयमात् व्युत्थितस्यापि ज्ञानानि जायन्ते। तत्र [3]प्रातिभं पूर्वोक्तं ज्ञानम्। श्रावणं श्रोत्रेन्द्रियजं दिव्यं ज्ञानम्। वेदना स्पर्शनेन्द्रियजं ज्ञानम्। आदर्शश्चक्षुरिन्द्रि-

---

१ 'परार्थत्वात्' इति सर्वसम्मतः पाठः। २ 'वेदनादर्शनास्वाद–' इति राजमार्तण्ड–भोज–वृत्तिकृत्सम्मतः पाठः। ३ प्रातिभं नाम अतीतानागत–विप्रकृष्ट–व्यवहित–पदार्थज्ञानम्।

यजं ज्ञानम् । आस्वादो रसनेन्द्रियजं ज्ञानम् । वार्ता गन्धसंवित् । सर्वत्र दिव्यत्वम् । एताः षट् सिद्धयो भवन्तीत्यर्थः ॥ ३७ ॥

ते समाधावुपसर्गाः, व्युत्थाने सिद्धयः ॥ ३८ ॥

ते प्राक्प्रतिपादिताः फलविशेषाः समाधावुपसर्गा विघ्नाः, व्युत्थाने विशिष्टफलदायकत्वात्सिद्धयो भवन्तीत्यर्थः ॥ ३८ ॥

परकायप्रवेशसिद्धिमाह—

बन्धकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ॥ ३९ ॥

व्याप्यात्मचित्तयोर्नियतकर्मणा शरीरान्तर्यद्भेदनं संबन्धः, तस्य कारणं धर्माधर्माख्यं यदा शिथिलं भवति तदा चित्तस्य योऽसौ प्रचारो हृदयाद्विषयाभिमुख्येन प्रसरः, तस्य ज्ञानाच्चित्तवहनाड्यादि यो जानाति स्वपरशरीरयोः, स जीवन्मृतं वा परशरीरं चित्तसंचारद्वारेण प्रविशति । चित्तं च परशरीरं प्रविशदिन्द्रियाण्यनुवर्तन्ते मधुकररा-

जमिव मधुमक्षिकाः । कर्मनाशायोगी सर्वत्र व्यवहरतीत्यर्थः ॥ ३९ ॥

जलादिस्तम्भनात्मिकां लघिमासिद्धिमाह—

उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च ॥ ४० ॥

हृदयान्मुखनासिकाद्वारेण वायोः प्रणयनात्प्राण इत्युच्यते । नाभिप्रदेशात्पादाङ्गुष्ठपर्यन्तमपनयनादपानः । नाभिप्रदेशं परिवेष्ट्या समन्तान्नयनात्समानः । कृकाटिकादेशादा शिरोवृत्तेरुन्नयनादुदानः । व्याप्य नयनात्सर्वशरीरव्यापी व्यानः । उदानस्य संयमद्वारेण जयादितरेषां वायूनां निरोधादूर्ध्वगामित्वेन जले नद्यादौ कर्दमे कण्टकादिषु वा न मज्जति । अतिलघुत्वात्तूलपिण्डवज्जलादौ मज्जितोऽप्युद्गच्छतीत्यर्थः । अयमुत्क्रान्तिशब्दार्थः ॥ ४० ॥

तेजस्वितासिद्धिमाह—

समानजयात्प्रज्वलनम् ॥ ४१ ॥

अग्निमावेष्ट्यास्थितस्य वायोः समानाख्यस्य जयाद्वशीकारादग्नेस्तेजसा प्रज्वलन्निव योगी भवतीत्यर्थः ॥ ४१ ॥

दिव्यश्रवणसिद्धिमाह—

श्रोत्राकाशयोः संबन्धसंयमाद्दिव्यं श्रोत्रम् ॥ ४२ ॥

श्रोत्रेन्द्रियाकाशयोः संबन्धो देशदेशिभावः। तस्मिन् कृतसंयमस्य योगिनो दिव्यं श्रोत्रं प्रवर्तते। युगपत्सूक्ष्मव्यवहितविप्रकृष्टग्रहणसमर्थं भवतीत्यर्थः ॥ ४२ ॥

आकाशगामिनीं सिद्धिमाह—

कायाकाशयोः संबन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् ॥ ४३ ॥

कायः शरीरम्। तस्य आकाशेनावकाशदानाद्यः संबन्धः तत्र संयमं विधाय, लघुनि तूलादौ समापत्तिस्तन्मयीभावलक्षणा तां च विधाय, प्राप्तात्यन्तलघुभावो योगी प्रथमं भुवि यथारुचि संचरन् क्रमेणोर्णनाभतन्तुजालेन संचरमाणः आदित्यरश्मिभिश्च विहरन् यथेष्टमाकाशेन गच्छति ॥ ४३ ॥

महाविदेहां सिद्धिमाह—

बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ॥ ४४ ॥

शरीराद्बहिर्या मनोवृत्तिः सा महाविदेहा नाम विगतशरीराहंकारदार्ढ्यद्वारेणोच्यते। ततस्तस्यां कृतात्संयमात् प्रकाशावरणक्षयः सात्त्विकचित्तस्य यः प्रकाशः तस्य यदावरणं क्लेशकर्मादि तस्य क्षयः प्रविलयो भवति ॥ ४३ ॥

एवं बाह्यान्तराः सिद्धीः प्रतिपाद्य समाध्युपयोगिनीः कथयंत्रादौ भूतजयसिद्धिमाह—

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्व-संयमाद्भूतजयः ॥ ४५ ॥

पञ्चानां भूतानां पञ्च स्थूलत्वादयो धर्माः। तत्र कृतसंयमस्य भूतजयो भवति। भूतानां दृश्यमानं विशिष्टं रूपं स्थूलम्। स्वरूपं कार्यं गन्धस्नेहोष्मताप्रेरणावकाशदानलक्षणम्। सूक्ष्मं गन्धादितन्मात्रलक्षणम्। अन्वयिनो गुणाः प्रकाशप्रवृत्तिस्थितिरूपतया सर्वत्रोपलभ्यन्ते। अर्थवत्त्वं नाम गुणेषु भोगापवर्गसंपादनाख्या शक्तिः। एवं पञ्चसूक्तलक्षणावस्थाभिन्नेषु प्रत्यवस्थं संयमं कुर्वन्योगी भूतजयी भवति ॥ ४५ ॥

तस्य फलमाह—

ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च ॥ ४६ ॥

अणिमा अणुत्वापत्तिः । महिमा महत्त्वम् । गरिमा गुरुत्वप्राप्तिः । लघिमा लघुत्वप्राप्तिः । प्राप्तिरङ्गुल्यग्रेण चन्द्रादिस्पर्शनशक्तिः । प्राकाम्यमिच्छानभिघातः । शरीरान्तःकरणेश्वरत्वमीशित्वम् । सर्वतः प्रभविष्णुत्वं वशित्वम् । सर्वभूतानि तदुक्तं नातिक्रामन्ति । त एतेऽणिमाद्याः समाध्युपयोगिनो भूतजयाद्योगिनः प्रादुर्भवन्ति । एता अष्टौ महासिद्धय इत्युच्यन्ते । कायसंपद्वक्ष्यमाणा, तां प्राप्नोति । तद्धर्मानभिघातश्च तस्य कायस्य ये धर्मा रूपादयः तेषाम् अनभिघातः अभिघातो नाशो नास्ति । अस्य रूपस्याग्निवाय्वादिना दाहशोषादिकं न भवतीत्यर्थः ॥ ४६ ॥

कायसम्पल्लक्षणमाह—

रूपलावण्यबलवज्रसंहननानि कायसंपत् ॥ ४७ ॥

रूपलावण्यबलानि प्रसिद्धानि । वज्रसंहननं वज्रवत्कठिना संहतिरस्य शरीरे भवतीत्यर्थः । इति कायस्याविर्भूतगुणसंपत् ॥ ४७ ॥

इन्द्रियजयमाह—

ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः ॥ ४८ ॥

ग्रहणं विषयाभिमुखी वृत्तिः। स्वरूपं सामान्येन प्रकाशत्वम्। अस्मिता अहंकारानुगमः। अन्वयार्थवत्त्वे पूर्ववत्। एतेषामिन्द्रियाणामवस्थापञ्चके संयमं कृत्वेन्द्रियजयी भवतीत्यर्थः ॥ ४८ ॥

इन्द्रियजयस्य फलमाह—

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ॥ ४९ ॥

शरीरस्य मनोवद्गतिलाभो मनोजवित्वम्। कायनिरपेक्षाणामिन्द्रियाणां वृत्तिलाभो विकरणभावः। सर्ववशित्वं प्रधानजयः। एतास्तिस्रः सिद्धयो जितेन्द्रियस्य प्रादुर्भवन्ति ॥ ४९ ॥

विशोकां सिद्धिमाह—

सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च ॥ ५० ॥

सत्त्वान्तःकरणे कृतसंयमस्य या उत्पद्यते सत्त्वपुरुषयोर्विवेकख्यातिर्गुणानां शिथिलीभावः, तत्र स्थितस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च भवति । इयं विशोका नाम सिद्धिः ॥ ५० ॥

एवं सिद्धीरुक्त्वा तन्नैरपेक्ष्येण दुःखनिवृत्तिपूर्वकं स्वरूपप्रतिष्ठात्मकं कैवल्यमाह—

तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥ ५१ ॥

तस्यामपि विशोकायां सिद्धौ यदा वैराग्यमुत्पद्यते, तदा दोषाणां रागादीनां यद्बीजमविद्यादयः, तस्य क्षये निर्मूलने, कैवल्यं आत्यन्तिकी दुःखनिवृत्तिः ॥ ५१ ॥

मुमुक्षोर्विघ्नोत्पत्तिनिरासायोपायमाह—

स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ॥ ५२ ॥

प्रधानजयस्य मधुमतीति संज्ञा । तस्यां कृतसंयमस्य स्थानिनो देवाः उपनिमन्त्रयितारो भवन्ति दिव्यस्त्र्यादिना । तस्मिन्नुपनिमन्त्रणे नानेन सङ्गः कर्तव्यः, नापि स्मयः, सङ्गस्मयकरणे समाध्युत्साहानिष्टप्रसङ्गात् ॥ ५२ ॥

सर्वज्ञतायाः साधनभूतस्य विवेकजन्यज्ञानस्योत्पत्तिमाह—

[1]क्षणक्रमसंयमाद्विवेकजं ज्ञानम् ॥ ५३ ॥

क्षणानां यः क्रमः पौर्वापर्येण परिणामः, तत्र संयमात् प्रागुक्तविवेकजं ज्ञानमुत्पद्यते । सूक्ष्मक्षणादिज्ञानात् सूक्ष्ममहदादीनां ज्ञानं भवति ॥ ५३ ॥

तत्फलमाह—

जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः ॥ ५४ ॥

पदार्थानां भेदहेतवो जातिलक्षणदेशा भवन्ति, यथा तुल्यपरिमाणयोरामलकयोर्भिन्नदेशावस्थितयोर्यत्र भेदो न ज्ञायते, तत्रापि कृतसंयमस्य ज्ञानमुपजायते, उभयोर्भेदप्रतिपत्तिर्भवत्येव ॥ ५४ ॥

विवेकजन्यज्ञानस्य लक्षणं विशिष्टफलं चाह—

तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम् ॥ ५५ ॥

---

१. 'क्षणतत्क्रमयोः' इति तु भाष्यादिसंमतः पाठः । तत्र क्षणानां तत्क्रमस्य चेति संयमद्वयमवसेयम् ।

उक्तसंयमबलादन्त्यभूमिकोत्पन्नं ज्ञानं संसारोत्तारणात्तारकमित्युच्यते। सर्वाणि महदादीनि विषयोऽस्येति सर्वविषयम्। तत्त्वानां स्थूलाद्यवस्थाविषयत्वात्सर्वथाविषयम्। अतीतादिविषयत्वादक्रमम्। सर्वं करतलामलकवद्युगपत् पश्यतीत्यर्थः॥ ५५॥

एवं मोक्षोपायभूतान् संयमानुक्त्वा तत्साधनोपायमाह—

सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम् (इति)॥ ५६॥

उक्तलक्षणयोः सत्त्वपुरुषयोः शुद्धिसाम्येऽपि सत्त्वस्य कर्तृत्वनिवृत्त्या स्वकारणे लयः पुरुषस्योपचरितभोगनिवृत्त्या कैवल्यं मोक्षो भवतीत्यर्थः॥ ५६॥

इति श्रीपातञ्जलयोगदर्शने तृतीयः पादः।

---

१ 'इति—' शब्दो राजमार्तण्डभोजवृत्त्योर्भाष्यस्य चासम्मतः। अत्रायं पादपूर्तिबोधक इति ज्ञेयम्।

कैवल्यपादः ४।

कैवल्याख्यं चतुर्थं पादमाह। तत्र सिद्धीनामनेकजत्वं सूचयति—

जन्मौषधिमन्त्रतपस्समाधिजाः सिद्धयः ॥ १ ॥

काश्चन जन्मत एव कपिलादीनाम्। ओषधिसिद्धयः [नाा]रदादयः। मन्त्रसिद्धिराकाशगमनादिः। तपस्सिद्धिर्विश्वामित्रादीनाम्। समाधिजाः प्राक्प्रतिपादिताः। (एवं पञ्चविधाः सिद्धयः)॥ १ ॥

जन्मान्तरोपार्जितमपि एतज्जन्महेतुभूतमित्याह—

जात्यन्तरपरिणामः प्रकृत्या[1]पूरणात् ॥ २ ॥

---

१. 'प्रकृत्यापूरात्' इति भाष्यादिसम्मतः पाठः।

यो ह्यस्मिञ्जन्मनि जात्यन्तरपरिणामः, स प्रकृत्यापूरणात् । पाश्चात्त्यजन्मप्रकृतयोऽस्मिञ्जन्मनि विकारानापूरयन्ति ॥ २ ॥

न [1]कार्येण [2]कारणं प्रवर्तते इत्याशयेनाह—

निमित्तमप्रयोजकं प्रकृतीनां, वरणभेदस्तु ततः क्षेत्रिकवत् ॥ ३ ॥

निमित्तं धर्मादि । तन्न प्रयोजकं प्रकृतीनां परिणामे । ततो धर्मादेः वरणभेदः, वरणमावारकमधर्मादि, तद्विरोधित्वाद्भेदः क्षयः क्रियते; यथा क्षेत्रिकः कृषीवलः केदारात् केदारान्तरं जलानयनार्थं प्रतिबन्धावरणभेदमात्रं करोति, तद्वत् ॥ ३ ॥

योग्यनेकशरीराणि सचित्तानि युगपदेव सृजतीत्याह—

निर्माणचित्तान्यस्मितामात्रात् ॥४॥

योगिनः स्वयं निर्मितेषु कायेषु यानि चित्तानि, तानि मूलकारणादस्मितामात्रात्प्रसरन्ति, अग्नेर्विस्फुलिङ्गा इव ॥ ४ ॥

---

१ अत्र कार्यं धर्मादि । २ कारणं प्रकृतिः ।

योगिनोऽनेकचित्तत्वेऽपि अनेकाभिप्रायाभावमाह—

प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् ॥ ५ ॥

चेतसां प्रवृत्तिभेदे व्यापारनानात्वे एकं योगिनश्चित्तं प्रयोजकं अधिष्ठातृत्वेन प्रेरकम्। तेन न भिन्ननिमित्तत्वम् ॥ ५ ॥

जन्मादिसिद्धिप्रभवे चित्तपञ्चके समाधिप्रभवस्य वैलक्षण्यमपवर्गार्हत्वं चाह—

तत्र ध्यानजमनाशयम् ॥ ६ ॥

ध्यानजं समाधिजं यच्चित्तम्, तत् जन्मादिप्रभवेषु पञ्चसु मध्ये अनाशयं कर्मवासनारहितमित्यर्थः ॥ ६ ॥

योगिनश्चित्तवत्तत्कर्मणोऽपि वैलक्षण्यमाह—

कर्माशुक्लाकृष्णं योगिनः, त्रिविधमितरेषाम् ॥ ७ ॥

शुक्लं, कृष्णं, शुक्लकृष्णं, अशुक्लाकृष्णमिति चतुर्विधं कर्म। तत्र शुभफलदं यागादि कर्म शुक्लम्, अशुभफलदं ब्रह्महत्यादि कृष्णम्, उभयं संकीर्णं शुक्लकृष्णम्, शुभाशुभ-

फलहीनमशुक्लाकृष्णम् । तत्रापि शुक्लं दानादिमताम्, कृष्णं नारकिणाम्, शुक्लकृष्णं मनुष्याणाम्, योगिनां संन्यासवतामशुक्लाकृष्णम् । क्रियमाणं कर्म फलत्यागानुसंधानेनानुष्ठानान्न किंचित्फलमारभते ॥ ७ ॥

तत्तत्कर्मणां तत्तदनुकूलवासनारम्भकत्वमाह—

ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम् ॥ ८ ॥

द्विविधवासनामध्ये जात्यायुर्भोगफलाः पूर्वं कृतनिर्णयाः । स्मृतिमात्रफलासु ततः कर्मणो यादृक्छरीरमारब्धं देवादि, तस्य विपाकस्य या अनुगुणा अनुरूपा वासनाः, तासामेव तस्मादभिव्यक्तिर्वासनानां भवति ॥ ८ ॥

जन्मान्तरास्तित्वं दर्शयन् आसां कार्यकारणभावानुपपत्तिं निराकरोति—

जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात् ॥ ९ ॥

इह कांचिद्योनिमनुभूय यदा योन्यन्तरसहस्रव्यवधा-

नेन तामेव पुनर्योनिं प्रतिपद्यते, तदा तत्र या वासनाः प्रकटीभूता आसन्, तास्तथाविधव्यञ्जकाभावात्तिरोभूताः पुनस्तादृक्छरीरलाभे प्रकटीभवन्ति । जातिदेशकालव्यवधानेऽपि तासां स्वानुरूपस्मृत्यादिफलसाधने आनन्तर्यं नैरन्तर्यम् । कुतः ? स्मृतिसंस्कारयोरेकरूपत्वात् ॥ ९ ॥

वासनानां यदा प्रथमसेवानुभवस्तदा किं सनिमित्त उत निर्निमित्त इति शङ्कामपनयति—

तासामनादित्वमाशिषो नित्यत्वात् ॥ १० ॥

तासां वासनानाम्, अनादित्वं न विद्यते आदिर्यस्य तस्य भावस्तत्त्वम् । कुत इत्यत आह—आशिषो नित्यत्वात्; येयमाशीर्महामोहरूपा ‘ सुखसाधनं मे भूयात्, न कदाचित्तेन वियोगः ’ इत्येवंरूपसंकल्पो वासनाकारणम्, तस्य नित्यत्वात् ॥१०॥

वासनानामनादित्वेऽपि तद्धानोपायमाह—

हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः ॥ ११ ॥

वासनानामनन्तरानुभवो हेतुः, फलं शरीरादि, आश्रयो

द्धितत्त्वम्, आलम्बनं यदेवानुभवस्य, तैरनन्तानां वासनानां संगृहीतत्वात्तेषामभावे वासनाभावः ॥ ११ ॥

अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम् ॥ १२ ॥

सतामभावासंभवादसतां चोत्पत्त्यसंभवात्तैस्तैर्धर्मैः विपरिणममानो धर्मी एकरूपः । धर्मास्त्वनेकाः । तस्मात् धर्माणामतीतानागताद्यध्वभेदः । तस्मादपवर्गपर्यन्तमेकमेव चित्तं धर्मी ॥ १२ ॥

धर्माणां स्वरूपमाह—

ते व्यक्तसूक्ष्मा गुणात्मानः ॥ १३ ॥

धर्मिधर्माः व्यक्तसूक्ष्मसत्त्वादिगुणपरिणामरूपाः ॥१३॥

धर्म्येकत्वमाह—

परिणामैकत्वाद्वस्तुतत्त्वम् ॥ १४ ॥

यद्यपि गुणात्रयः, तथापि तेषामङ्गाङ्गित्वात् वस्तुनः तत्त्वमेकत्वम्; यथा—' इयं पृथिवी ' इत्यादि ॥ १४ ॥

वस्तुतो ज्ञानैकत्वे कथमेतदित्याह—

वस्तुसाम्ये चित्तभेदात्तयोर्विविक्तः पन्थाः ॥ १५ ॥

तयोर्ज्ञानज्ञेययोः विविक्तः पन्था। कथम्? वस्तुसाम्ये चित्तभेदात् छयादिवस्त्वेकत्वे प्रमातॄणां सुखादिनानारूपचित्तपरिणामवत्त्वात् ॥ १५ ॥

[न चैकचित्ततन्त्रं चेद्वस्तु तत्प्रमाणकं तदा किं स्यात् ॥ १६ ॥

(भाष्यम्) न चैकचित्ततन्त्रं चेद्वस्तु तत्प्रमाणकं तदा किं स्यात्। एकचित्ततंत्रं चेद्वस्तु स्यात्तदा चित्ते व्यग्रे निरुद्धे वा स्वरूपमेव तेनापरामृष्टमन्यस्याविषयीभूतमप्रमाणकमगृहीतस्वभावकं केनचित्तदानीं किं न स्यात्। सम्बध्यमानं वा पुनश्चित्तेन कुत उत्पद्येत ये चास्यानुपस्थिता भागास्ते चास्य न स्युरेवं नास्ति पृष्ठमित्युदरमपि न गृह्येत तस्मात् स्वतंत्रोऽर्थः सर्वपुरुषसाधारणः स्वतंत्राणि च चित्तानि प्रतिपुरुषे प्रवर्तन्ते तयोः सम्बंधादुपलब्धिः पुरुषस्य भोग इति ॥ १६ ॥]

चित्तस्य विभुत्वेऽपि सदा सर्वज्ञानाभावे हेतुं निरूपयन् कथं तद्युगपत्सर्वानर्थान्न गृह्णातीत्याशङ्क्य परिहरति—

---

१. एतत्सूत्रं भोजराजेनानन्तपण्डितेनचोपेक्षितमपि भाष्ये मूलत्वेन तदङ्गीकारादत्र सभाष्यमेव निवेशितम्।

तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् ॥ १७ ॥

तस्यार्थस्योपरागादाकारसमर्पणाच्चित्ते बाह्यं वस्तु ज्ञातमज्ञातं च भवतीत्यर्थः ॥ १७ ॥

पुरुषस्य परिणामित्वमाशङ्क्य परिहरति—

सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणांमात् ॥ १८ ॥

याश्चित्तस्य वृत्तयः ताः तत्प्रभोः तस्य चित्तस्य ग्रहीतुः पुरुषस्य सदा सर्वकालमेव ज्ञेयाः, तस्य चिद्रूपतया अपरिणामात् ॥ १८ ॥

ननु चित्तमेव स्वप्रकाशमस्तु; किं ग्रहीत्रन्तरकल्पनेनेत्याशङ्कां परिहरति—

न तत्स्वाभासं दृश्यत्वात् ॥ १९ ॥

तच्चित्तं स्वाभासं स्वप्रकाशं न भवति; किंतु पुरुषवेद्यम् । कुतः ? दृश्यत्वात् ॥ १९ ॥

बुद्धेरसंवेदने रागादयो नोपपन्ना इत्याशङ्कां निरसितुमाह—

एकसमये चोभयानवधारणम् ॥ २० ॥

---

१. '—अपरिणामित्वात्' इति भाष्यमूलपाठः ।

एकस्मिन्काले उभयस्य स्वरूपस्यार्थस्य चावधारयितुमशक्यत्वाच्चित्तं न स्वप्रकाशम् ॥ २० ॥

तर्हि बुद्ध्यन्तरेणास्तु ग्रहणमित्याशङ्क्याह—

चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसंकरश्च ॥ २१ ॥

यदि बुद्धिर्बुद्ध्यन्तरेण वेद्येत, तस्या अपि बुद्धित्वाद्बुद्ध्यन्तरमित्यनवस्थानात्तदर्थप्रत्यक्षं न स्यात्, स्मृतीनां रूपादिस्मृतीनां संकरश्च; किंविषयिणी स्मृतिरिति न ज्ञायेत ॥ २१

सिद्धान्तमाह—

चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम् ॥ २२ ॥

न विद्यते प्रतिसंक्रमोऽन्यत्र गमनं यस्याः सा अप्रतिसंक्रमा। तस्याश्चितेः पुरुषस्य सदैकरूपत्वात्तत्संनिधौ तदाकारमापद्यते चिच्छक्तिर्बुद्धिवृत्त्यविशिष्टतया संपद्यते यदा, तदा बुद्धेः स्वस्यात्मनो वेदनं भवतीत्यर्थः ॥ २२ ॥

चेतनाचेतनस्वरूपापन्नस्य चित्तस्य सर्वार्थकतामाह—

द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम् ॥ २३ ॥

द्रष्टा पुरुषः, तेनोपरक्तं तदाकारतामिव प्राप्तम्, दृश्योपरक्तं विषयाकारपरिणामं यदा भवति, तदा तदेव सर्वार्थग्रहणसमर्थं जायते ॥ २३ ॥

नानारूपस्य चित्तस्यापि परार्थतां दर्शयन् द्रष्टरि प्रमाणमाह—

तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात् ॥ २४ ॥

तदेव चित्तं संख्यातुमशक्याभिर्वासनाभिः चित्रमपि नानारूपमपि परार्थं परस्य स्वामिनो भोक्तुर्भोगापवर्गलक्षणार्थं साधयति । कुतः ? संभूय मिलित्वार्थक्रियाकारित्वात्, यथा गृहादि ॥ २३ ॥

इदानीं कैवल्यं निर्णेतुं दश सूत्राणि, तत्रादौ कैवल्याधिकारिणमाह—

विशेषदर्शिन आत्मभावभावनानिवृत्तिः ॥ २५ ॥

एवं सत्त्वपुरुषयोरन्यत्वे साधिते, यस्तयोर्विशेषं पश्यति 'अहमस्मादन्यः' इत्येवंरूपम्, तस्य ज्ञातचित्तस्वरूपस्य चित्ते या आत्मत्वभावना, सा निवर्तते । चित्तमेव कर्तृ ज्ञातृ भोक्तृ इत्यभिमानो निवर्तते ॥ २९ ॥

तच्चित्तस्याधिकारित्वं स्वरूपं चाह—

तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम् ॥ २६ ॥

---

१ 'विनिवृत्तिः' इति भाष्यादिसम्मतः पाठः ।

यदस्याज्ञाननिम्नं बहिर्मुखं विषयभोगफलं चित्तमासीत् तदिदानीं विवेकनिम्नं विवेकमार्गमन्तर्मुखं कैवल्यप्राग्भारं कैवल्यफलं कैवल्यप्रारम्भं वा संपद्यत इति ॥ २६ ॥

अस्मिंश्च विवेकवाहिनि चित्ते येऽन्तराया: प्रादुर्भवन्ति तेषां हेतुप्रतिपादनद्वारेण त्यागोपायमाह—

तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥ २७ ॥

तस्मिन्समाधौ स्थितस्य च्छिद्रेष्वन्तरालेषु यानि प्रत्ययान्तराणि व्युत्थानरूपाणि ज्ञानानि, तानि प्राक्तनेभ्यो व्युत्थानानुभवजेभ्यः संस्कारेभ्यः अहं ममेत्येवंरूपाणि क्षीयमाणेभ्योऽपि प्रभवन्ति। अन्तःकरणोच्छित्तिद्वारेण तेषां हानं कर्तव्यमित्युक्तं भवति ॥ २७ ॥

हानोपायः पूर्वमेवोक्त इत्याह—

हानमेषां क्लेशवदुक्तम् ॥ २८ ॥

यथा क्लेशानामविद्यादीनां हानं पूर्वमुक्तम्, तथा संस्काराणामपि कर्तव्यम्। यथा ते ज्ञानाग्निना प्लुष्टा दग्धबीजकल्पा न पुनश्चित्तभूमौ प्ररोहं लभन्ते, तथा संस्कारा अपि ॥ २८ ॥

एवं प्रत्ययान्तरानुदयेन स्थिरीभूते समाधौ यादृशस्य योगिनः समाधिप्रकर्षप्राप्तिर्भवति, तथाविधमुपायमाह—

प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः ॥ २९ ॥

प्रसंख्यानं यावतां तत्त्वानां यथाक्रमं व्यवस्थितानां परस्परविलक्षणस्वरूपपरिभावनम् । तस्मिन्सत्यपि अकुसीदस्य फलमलिप्सोः प्रत्ययान्तराणामनुदये, सर्वप्रकारविवेकख्यातेः परिशेषाद्धर्ममेघः समाधिः भवति । प्रकृष्टमशुक्लकृष्णं धर्मं परमपुरुषार्थसाधकं मेहति सिञ्चतीति धर्ममेघः । अनेन प्रकृष्टस्य धर्मस्यैव ज्ञानहेतुत्वमित्युपपादितं भवति ॥ २९ ॥

तस्माद्धर्ममेघात्कि भवतीत्यत आह—

ततः क्लेशकर्मनिवृत्तिः ॥ ३० ॥

ततो धर्ममेघात् क्लेशानामविद्यादीनामभिनिवेशान्तानां कर्मणां च शुक्लादिभेदेन त्रिविधानां ज्ञानोदयात्पूर्वपूर्वकारणनिवृत्त्या निवृत्तिर्भवतीत्यर्थः ॥ ३१ ॥

क्लेशकर्मनिवृत्तेः फलमाह—

तदा सर्वावरणापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्पम् ॥ ३१ ॥

आव्रियते चित्तमेभिरित्यावरणानि क्लेशाः, तेभ्योऽपे-

---

१. 'सर्वावरणमलापेतस्य' इति भाष्यसंमतः पाठः ।

तस्य तद्विरहितस्य शरद्गगनप्रतिमस्य ज्ञानस्य आनन्त्यादनवच्छेदात् ज्ञेयमल्पगणनास्पदं भवति । अक्लेशेनैव सर्वं जानातीत्यर्थः ॥ ३१ ॥

ततः किमित्याह—

ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम् ॥ ३२ ॥

कृतो निष्पादितो भोगापवर्गलक्षणः पुरुषार्थो यैस्ते कृतार्था गुणाः सत्त्वरजस्तमांसि । तेषां परिणाम आ पुरुषार्थसमाप्तेरानुलोम्येन प्रातिलोम्येन चाङ्गाङ्गिभावस्थितिलक्षणः; तस्य योऽसौ क्रमो वक्ष्यमाणस्तस्य परिसमाप्तिर्निष्ठा । न पुनरुद्भवन्तीत्यर्थः ॥ ३२ ॥

क्रमस्योक्तस्य लक्षणमाह—

क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ॥ ३३ ॥

क्षणोऽल्पीयान्कालः, तस्य योऽसौ प्रतियोगी एकक्षणविलक्षणः परिणामापरान्तनिर्ग्राह्यः अनुभूतेषु क्षणेषु पश्चात्संकलनाबुद्ध्यैव यो गृह्यते, स क्षणानां क्रम उच्यते । न ह्यननुभूतेषु क्षणेषु क्रमः परिज्ञातुं शक्यः ॥ ३३ ॥

इदानीं फलभूतस्य कैवल्यस्यासाधारणं स्वरूपमाह—

पुरुषार्थशून्यानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ॥ ३४ ॥

समाप्तभोगापवर्गलक्षणपुरुषार्थानां गुणानां यः प्रतिप्रसवः प्रतिलोमस्तस्य परिणामस्य समाप्तौ विकाराद्भवः; यद्वा चितिशक्तेर्वृत्तिसारूप्यनिवृत्तौ स्वरूपमात्रेणावस्थानं तत्कैवल्यमुच्यते । न केवलमस्मद्दर्शने क्षेत्रज्ञः कैवल्यावस्थायामेवंभूतः । दर्शनान्तरेष्वपि विमृश्यमान एवंरूप एवावतिष्ठते । यस्माच्छास्त्रान्तरेष्वेवमेव निश्चयः, तस्मादिदमेव युक्तं वृत्तिसारूप्यपरिहारेण स्वरूपप्रतिष्ठा चितिशक्तिः कैवल्यमिति । तदेवं सिद्ध्यन्तरेभ्यो विलक्षणा सर्वसिद्धिमूलभूता समाधिसिद्धिः सैव साधनीयेति ॥ ३४ ॥

सूत्रार्थवृत्तिमालोच्य कृतेयं पदचन्द्रिका ।
अनन्तेनेश्वरप्रीत्यै चार्पिता शिवपादयोः ॥

इति श्रीपातञ्जलयोगदर्शने
चतुर्थः कैवल्यपादः ।

संपूर्णश्चायं ग्रन्थः ।

	रु. आ. पै.
पंचांग चैत्री	०— १—०
पारस्करं-गृह्यसूत्रम्	६— ८—०
प्रतिष्ठामयूखः	०— ८—०
ब्रह्मसूत्रवृत्तिः (अद्वैतमंजरी)...	०—१२—०
भगवद्गीता सप्तटीकोपेता प्रथमो भागः ...	१०— ०—०
,, अष्टटीकोपेता द्वितीयो भागः ...	१०— ०—०
भक्तिमार्तण्डः	१— ४—०
*महाभागवतम्-देवीभागवतम्	२— ०—०
मनुस्मृतिः-(कुल्लूकभट्टकृतटीकायुता) ...	२— ४—०
विराटपर्व (महाभारतस्य) पंचटीकोपेतम् ...	४— ८—०
युद्धकांडं टीकात्रयोपेतम्	८— ०—०
रघुवंशं (दण्डान्वयसहित मल्लीनाथकृतटीका-युतम्-सर्गाः १— ५)	०— ८—०
रघुवंशं संपूर्ण-सदण्डान्वयं मल्लीनाथकृत-टीकासहितं च	१— ४—०
वादार्थसंग्रहः भागः १	०— ६—०
,, २	०— ८—०
,, ३	०— ८—०
,, ४	०—१२—०
विदुरनीतिः	०— ६—०
वेदान्तरहस्यम्	०— १—०